'कोलंबा' इति पिठरवाची देशीपदम् । जलधरा एव कोलंबाः पिठराणि वह्निना क्वाथ्यमानजलानि सफेनोद्गमानि मषीभिर्मलिनानि सन्ति कलकलायन्ति । तथा जलधरकोलम्बा विद्युता वह्निरूपेण क्वाथ्यमानजलाः । तथा बलाका एव फेनोद्गमो येषां ते बलाकाफेनोद्गमाः । मषीवन्मलिना मषीमलिनाः सन्तो गर्जितै रावणोपलक्षिताः सन्तः 'कलयलंति व्व' क्वथनशब्दमिव कुर्वन्तीति रूपकोत्प्रेक्षा ॥

As the water in the jet black cloud-pots is boiled by lightning-fire, there comes up the froth of cranes and the sizzling sound of thunder. (25)

**The cloud-field**

[11] मारुय-तोत्तय-संचोइएण गाहेइ पाउस-कुडुंबी ।
नह-केयारं कसिणब्भ-मंडली-माहिसक्केण ॥ २६

नभ एव केदारो नभकेदारः । प्रावृडेव कुटुम्बी । कृष्णाभ्रमण्डल्येव 'माहिसक्कं' महिषयूथं कृष्णाभ्रमंडलीमहिषयूथम् । 'तोत्तयः' इति प्राजनो महिषादिप्रेरणी सलोहमया काष्ठदण्डिकोच्यते । मारुत एव 'तोत्तय' तोत्रं प्राजनस्तेन चोदितं प्रेरितम् । अतस्तेन मारुतप्राजनप्रेरितेन कृष्णाभ्रमण्डलीमहिषयूथेन प्रावृट्कुटुम्बी नभःकेदारं गाहते इति ॥

The Rainy Season like a farmer moves across the field of sky along with the buffalo-herd of dark cloud-masses, which he prodes with the driving rod of the wind-blast. (26)

### The cloud-skin

[12] जलहर-खल्ला-सित्ताए पाउसो वारिउ व्व धरणीए ।
गोमय-रस-दुआलिं व देइ हरियंकुरुप्पूरं ॥ २७

जललोडितो गोमयो 'गोमय-रस-दुयाली' इत्युच्यते । हरिताङ्कुराणां हरिततृणानां 'उप्पूरं' निकरं जललोडितगोमयरसमिव । जलधरः स एव 'खल्ला' दृतिस्तया सिक्ताया धरण्या भुवः । प्रावृट्समयो वारिकः । ततस्तत्कालजन्मना हरिततृणाङ्कुरनिकरेण जलसमालोडितगोमयरसेनेव भूतलं विलिम्पति ॥

The Rainy Season, like a plasterer, having first sprinkled the earth with water from the leather bag of clouds, smears the earth with the liquid cowdung-plaster in the form of the mass ot the sprouting green grass. (27)

### Fallen into line

[13] घण-पडलेहिँ छइज्जंतयाइं दट्ठूण जणवय-घराइं ।
छाएइ तहेव नहं पि पाउसो हारि-वडिओ व्व ॥ २८

एकत्र घनानि निबिडानि 'पडलाणि' पटलानि तृणछज्जयः ! अन्यत्र घनानां मेघानां पटलानि जालानि । तत्र प्रावृट्समयो घनपटलैर्निबिड-तृणमयाच्छादनैश्छाद्यमानानि जनपदगृहाणि दृष्ट्वा स्वयमप्यसौ तथैव हारिपतित एवं घनपटलैर्मेघजालैर्नभोऽपि छादयति । यथा हार्यां पतितो गच्छतो वहन् जनानवलोक्य पुरः समविषमादिकमनालोच्य गच्छति । तथा सकलजनपदैः स्वगृहाणि घनपटलैः [4A] छाद्यमानानि दृष्ट्वा प्रावृट्समयोऽहमपि घनपटलैर्नभश्छादयामि इति मत्वेव छादयन् हारि-पतित इवेत्युच्यते ॥

Seeing people's houses being covered with *ghaṇa-paḍala* ('thick thatching'), the Rainy Season too, as if fell into line and started to cover the sky similarly with *ghaṇa-paḍala* ('layers of clouds'). (28)

(Index Verse 7)

'नह-चंडिल'-'नह-कप्पर'-'गयणच्छि'त्ति य तिहा-कय-नहेहिं।
आयरियस्स पएहिं हरिणो व्व जयं समक्कंतं ॥२९

आचार्यस्य बप्पभट्टेर्हरेरिव पदैस्त्रिभिर्जगत् समाक्रान्तम् ! बप्पभट्टे-स्तावत् पदैर्वचनैः पभिर्जगदाक्रान्तम् । कीदृशैः 'तिहा-कय-णहेहिं' त्रिधा तिसृषु गाथासु कृतनहैः कृतबन्धैस्तैस्त्रिधाकृतनभोभिः । कथमित्याह । नभश्चण्डिल-नभःकर्पर-गगनाक्षीति । यथा हरेरपि त्रिधाकृतं त्रिखण्डीकृतं नभो गगनं यैस्तानि तथा । [त]तस्तैस्त्रिधाकृतनभोभिर्जगदाक्रान्तं व्याप्तमिति ॥

As the world was conquered by the three steps (*paya*) of Viṣṇu that divided the aerial space in three parts (*tihā-kaya-naha*), so the three keywords (*paya*) viz. *naha-caṁḍila*, *naha-kappara*, and *gayaṇacchi* of Āyariya (Sk. Ācārya i e. Bappabhaṭṭi), figuring in the three Gāthās (*tihā-kaya-naha*) have conquered the world. (29)

The whetting slab of the Sky-Barber

[14] सुरचावोलवण-घणोह-भंडिया-निहिय-तडिगुण-छुरस्स ।
नह-चंडिलस्स रेहइ चंद-कला फलिह-सिलिय व्व ॥ ३०

नापितक्षुररदनाधारा भण्डिका । सुरचापमेव 'ओलवणं' आरोपणं यस्याः सा तथा घनौघः मेघौघः स एव भण्डिका घनौघभण्डिका । सुरचा-पारोपणा चासौ घनौघभण्डिका च सुरचापारोपणघनौघभण्डिका । तत्र निहितः स्थापितः तडिद्गुण एव क्षुरो येन स तथा तस्य सुरचापारोपण-घनौघभण्डिकानिहिततडिद्गुणक्षुरस्य नभश्चण्डिलस्य नभोनापितस्य सम्बन्धिनी स्फटिकशिलिकेव चन्द्रकला राजते ! अल्पा शिला शिलिकेति ॥ ३०

The crescent moon shines as if it were the whetting slab of the Sky-Barber, carrying on his rainbow-sling the shaving box of the cloud-mass that contained the lightning-razor, (30)

### The quicksilver drops

[15] दव-दड्ढ-पव्वउड्डीण पारयाबद्ध-बिंदु-निवहं व ।
नह-कप्परं विरायइ फुरंत-तारा-गणाइण्णं ॥ ३१

ज्वलदनलताप्यमानाधारः पारदः पात्यमानः पातनायन्त्रेणोड्डीनः सन्नुपरि कर्परे कणशो लग्नस्तिष्ठति । सोऽर्थोऽयमाचार्येणोत्प्रेक्ष्यतेऽत्र यथा—दवेन दग्धास्तापिता ये पर्वतास्तेभ्य उड्डीन उद्धूतो यः पारदः सूतकस्तेनाबद्धो रचितो बिन्दुनिवहो यस्मिंस्तथा । नभ एव कर्परं नभःकर्परं, स्फुरता दीप्तिमता तारागणेनाकीर्णं व्याप्तं स्फुरत्तारागणाकीर्णं, तत्तादृशं सन्नभःकर्परं दवदग्धपर्वतोड्डीनपारदाबद्धबिन्दुनिवहमिव विराजते ॥ ३१

The pot-sherd of sky shines full of a mass of scintillating stars that are like a collection of quicksilver drops formed thereon, having risen up from the forest-fire-heated mountains. (31)

### The poultice of the autumn cloud

[16] गयणच्छिणो गलंतस्स कालिया-नीलि-पिहिय-तारस्स ।
देइ सरओ सियब्भं पय-गब्भं रूय-पडलं व ॥ ३२

मेघान्धकारजनितं मलिनत्वं कालिका । तारा नयनगता पुष्याश्लेषादिर्वा । कालिकैव नीली नयनदोषः कालिकानीली, तया पिहिताऽन्तर्हिता तारा यस्य तत्तथा । गगनाक्षिणो गलतः स्यन्दमानस्य सिताभ्रं श्वेतमभ्रं पयोगर्भं 'रूय-पडलं व' रूतपटलमिव शरत्समयो ददाति । 'रूयं' इति सामान्यभाषया कर्पासरोमचयः पिचूच्यते । एतदुक्तं भवति । स्यन्दो नाम नयनरोगस्तेनाक्ष्णो नील्यन्तरिततारस्य गलतः क्षीरगर्भं रूतपटलं विस्तीर्णरूपं पिचु कश्चिद् दत्ते तेन तन्न गलति । एवं गगनस्य सजलदवत्तया गलतः कालिकान्तरितपुष्यादितारस्य किंचिज्जलगर्भं सिताभ्रं शरत्समयो ददाति तेन तन्न गलति । सत्यां शरदि जलदोदयाभावात् । अतो गगनादि नयनादिभी रूपितमिति रूपकालङ्कारः ॥

To the dripping sore eye in the form of the sky with the eye-balls of stars covered with darkness (*nīlī*), the Autumn applies

cotton poultice in the form of white clouds drenched in *payas* ('milk', also 'water'). (32)

(Index Verse 8)

'मरगयमयायवत्तं' गयवइणो जयइ पयडिय-च्छायं ।
जेणोवरिट्ठिएण वि सेसा कइणो हय-च्छाया ॥ ३३

प्रकटितच्छायेनातपत्रेण ह्युपरिस्थितेन सर्व एव सच्छाया भवन्ति । गजपतेस्तु कवेः सम्बन्धिना येनोपरिस्थितेनापि सता शेषाः कवयो हतच्छाया भवन्ति । तन्मरकतमयातपत्रं गाथयोत्प्रेक्षितं प्रकटितच्छायं जयति । शब्दविरोधोऽत्र नार्थविरोधः । यतो गजपतिना यदुत्प्रेक्षितम् मरकतमयातपत्रमिवेति प्रकटितच्छायं प्रकटितशोभम् । अत एव शेषकवीनां तत्कवित्वजितानामुपरि स्थितमत एव चानेनोपरिस्थितेन जितत्वाच्छेषकवयो हतच्छाया हतशोभा भवन्ति ॥

Victorious is Gayavai's (Sk. Gajapati's i. e. Bappabhaṭṭi's) *maragayamayāyavatta* (i. e 'the Gāthā having that as a keyword'; alternatively, 'emerald-studded umbrella'), which is *payaḍiya-cchāya* ('beautiful'; alternatively, 'which gives shade'), and is such that eventhough it is there above (alternatively, 'because it stands above all'), the rest of the poets become lustreless (alternatively, 'do not get any shade'). (33)

**The emerald umbrella**

[17] उयह नहं मज्झगएक्क-मेह-मुच्चंत-संतय-जलोहं ।
सरयस्स फलिह-दंडं मरगय-मयायवत्तं व ॥

'उयह' पश्यत नभः । कीदृशम् । मध्यगतैकमेघेन मुच्यमानः संततोऽविच्छिन्नो जलौघो यस्मिंस्तन्मध्यगतैकमेघमुच्यमानसंततजलौघं तदीदृशं नभः किमिवेत्याह । 'सरयस्स' शरत्समयस्य नायकस्य स्फटिकः दण्डो यस्य तत् स्फटिकदण्डं मरकतमयमिवातपत्रं छत्रम् । अयमत्रार्थः । मध्यगतैकमेघमुच्यमानसंततजलौघेन स्फटिकदण्डाकृतिनोपलक्षितं प्रायो- -जलधाराधरोध- -विकचकुवलयवनाच्छविनभोमण्डलं मरकतमयं कर्तुमिव शरत्समयनायकस्य पश्यतेति ॥

You look at the sky : It has a cloud in its centre raining continuously water in huge quantities, and thereby resembling the Autumn's emerald umbrella that has a marble rod. (34)

(Index Verse 9)

'फणि'-'वार-रमणि'-'पईव'-'वरिस-पाहुणय'-इय-पईवेहिं ।
उज्जाइयं जयं सेय-भिक्खुणा पयडियत्थेहिं ॥३५

प्रकटितघटाद्यर्थैः प्रदीपैर्हि केनापि जगदुद्योत्यते । श्वेतभिक्षुणा श्रीबप्पभट्टिना पुनः फणिवाररमणीत्यादिगाथाचतुष्टयनिबद्धप्रदीपैः प्रकटितवाच्यार्थैः जगदुद्द्योतितम् । यतः तदर्थभावनापरिगतपरमपरितोषपूरितहृदयस्य जगतो मुखविकारादिरूपो भवत्येवोद्द्योतः ॥

The Seyabhikkhu (Sk. Śvetabhikṣu i. e. Bappabhaṭṭi) has illuminated the world by means of five lamps, viz. (the Gāthās with the respective keywords) *phaṇi*, *vāraramaṇi*, *païva* and *varisa-pāhuṇaya* which reveal *attha* ('deep-lying meanings'; alternatively, 'objects'). (35)

The Lamp-Snakes

[18] पायालोअरण-मणा कय-घण-कज्जा फणि-व्व फुड-मणिणो ।
बद्धुद्ध-धूम-दंडा महीए दीवा विरायंति ॥३६

घनकार्यं कर्तुं किल प्रावृषि सर्पाः पातालादिहायान्ति । पुनः कृतघनकार्याः शरदि पातालं विशन्ति । सोऽयमर्थो दीपालिकायां दीपेषु कविनोत्प्रेक्ष्यते । यथा बद्धो रचित ऊर्ध्वं धूमदण्डाकृतिर्धूमोयस्ते बद्धोर्ध्वधूमदण्डा दीपा मह्यां पृथिव्यां विराजन्ते । क इव इत्याह । कृतं घनानां मेघानां कार्यं घनानि वा कार्याणि यैस्ते कृतघनकार्याः । स्फुटा मणयो येषां ते स्फुटमणयः । पातालावतरणे मनो येषां तादृशाः फणिन इव । एतदुक्तं भवति । उरगशरीराकारोर्ध्वप्रवृत्तधूमदण्डोपलक्षितः

शिरोमणिनिभप्रदीप्तदशामुखविलसदर्चिषो दीपाः प्रावृषि घनकार्यं कृत्वेदानीं पाताल प्रवेष्टुकामाः स्फुटमणयः फणिन इव विराजन्ते ॥

On the earth the lamps with the columns of smoke arising from them are shining : they appear like snakes with their bright jewels, who having accomplished the task of the clouds (*or* 'many tasks'.) now intend to reenter the nether world. (36)

[19] तुह वार-रमणि-संमद्द-खुडिय-फुड-पोमराय-संवलिया ।
उज्झंतेहिं पयंगेहिं नवर दीवा मुणिज्जंति ॥३७

हे राजन्, तव वाररमणिनां सम्मर्दत्रुटितैः स्फुटपुष्परागैर्मणिभिः संवलिता मिश्रिताः सन्तो दीपाः सादृश्यादज्ञाताः । 'नवरं' केवलं दह्यमानैः पतङ्गैरवगम्यन्ते इमे दीपा इति । विभावोदात्ताख्योपमलङ्कारः ॥

The lamps, intermingled as they are with the bright rubies broken loose due to great commotion among your courtesans, can be distinguished as such only through the moths burning. (37)

[20] एएण विम्हओ म्हं जं पहु बहु-विमल-रयण-दीवस्स ।
दीवालियाए वि तुहं दीसेइ एक्को वि न पईवो ॥३८

बह्वो विमलरचना विमलरत्नोपलक्षिता वा विमलरत्नान्येव वा दीपा यस्य स तथा । तस्य बहुविमलरचनादीपस्य विमलरत्नदीपस्य वा । दीपालिकायामपि तव प्रभो यदेकोऽपि न दृश्यते प्रदीपः । एतेनामेन विस्मयोऽस्माकम् । विभवहीनस्यापि किल दीपालिकायां गृहे बहवो दीपाः स्फुरन्ति ! यस्तु बहुरत्नदीपो महीपतिस्तस्य दीपालिकायामप्येकोऽपि प्रदीपो न दृश्यत इति महदाश्चर्यमिति निन्दा । तथा एतेन विस्मयोऽस्माकं यत् प्रभो, बहुविमलरत्नद्वीपस्य तव द्वीपालिकायामपि सिंहलादिद्वीपपङ्क्तावप्येकोऽपि 'पईवो' इति प्रतीपः प्रतिकूलो न दृश्यत इति प्रशंसा । तदत्र प्रशंसनीयार्थप्रतिपादनप्रसंगेन प्राकृतशब्दश्लेषवशान्निन्दनीयार्थोऽपि जात इति निन्दास्तुतिरयमलङ्कारः ॥

This is, O lord, a great wonder for us that eventhough there is *dīvāliyā* ('Dīvālī, the festival of lights'; alternatively, 'the rows of

conquered islands and continents') and you have many *viamla-rayaṇadiva* ('lamps of pure gems'; alternatively, 'islands that produce precious gems'), you are not seen with a single *paiva* ('lamp lighted'; alternatively, 'enemy'). (38)

[21] दड्ढ-पयावइ-निम्मिय घराहरिं भमिर वरिस-पाहुणय ।
णिय-णेह-क्खय-कारय होसि पईवो न संदेहो ॥३९

दग्धप्रजापतिना कुम्भकारेण विनिर्मित, 'घराघरिं भमिर' इति गृहाद् गृहं भ्रमणशील, वर्षप्राघूर्णक, नीतस्य स्थापितस्य स्नेहस्य तैलादेः क्षय-कारक भवसि प्रदीपो न संदेहः । इति दीपालिकाप्रदीपसाम्येन नायिका काचित् प्रियमुपालभते । यथा—हे प्रिय, दग्धप्रजापतिना हतविधिना निर्मित, रागतरलत्वादपरापरनारीणां गृहे गृहे भ्रमणशील, वर्षेण प्राघूर्णक वर्षा-देकवारमस्मद्गृहमागच्छन्, अत एवं निजस्नेहक्षयकारक, भवसि प्रतीपः प्रतिकूलो न संदेह इति ॥

Manufactured by a wretched potter, going from house to house, annual guest, consuming the oil supplied, you are indeed a lamp—no doubt about that.

(*Alternatively*) Created by the hopeless creator, wandering from door to door, visiting me only once a year, destroyer of my love (towards you), you are absolutely disgusting. (39)

**(Index Verse 10)**

'अगया' 'सुहत्थिणो' 'सुरयणं' च 'नालक्खयं' 'रयण-कोडी' ।
इय थुव्वइ नरनाहो तह वि जसो भद्दइत्तिस्स ॥४०

गाथा-पञ्चकेन नरनाथः स्तूयते । तथाऽपि गाथाः के नामेदृशीर-क्लिष्टशब्दश्लेषनिर्वाहभाजो रचयितुमलमिति यशो भद्रकीर्तेर्बप्पभट्टे-र्भवतीति ।

Eventhough the Gāthās with the respective keywords *agayā*, *suhatthiṇo*, *surayaṇaṁ*, *nāla-kkhayaṁ* and *rayaṇa-koḍı* eulogize the king, it is Bhaddaitti (Sk, Bhadrakırti i.e. Bappabhaṭṭi) who has earned the fame. (40)

[22] सव्वे वि कया अगया जइय च्चिय नूणमहिवई तुमए ।
सयल-विस-मंत-सिद्धी तइय च्चिय तुज्झ संपन्ना ॥४१

अगदो विषनाशको योगः । सर्वेऽपि नूनं निश्चितम् अहिपतयः फणीन्द्राः 'जइया च्चिय' यदैव 'तुमए' त्वया अगदा विषविनाशिनो योगाः कृताः सकलविषमन्त्रसिद्धिः तदैव तव संपन्ना । विषापहमन्त्रा विषमन्त्रास्तेषां सिद्धिः । पुरुषस्य सर्वविषापहारे कृते सति जायतेऽभय[म्] । पुनरहीनामधिपतयस्तानेवागदान् विषनाशिनो योगान् करोति । तस्य सकलैव विषमन्त्र-सिद्धिः संपन्नैवेत्यमुमर्थं प्रतिपादयद्भिरेव पदैरपरः प्रकृतोऽर्थो योज्यते । तद्यथा ——प्राकृते 'नूणं' इत्यादीनां विभाषयाऽनुस्वारलोप उक्तः । यथा 'नवरं नवर', 'नूनं नून' । तेनायमर्थो—'नूण महिवई' नूनं महीपतयो रा[6 A]जानः सर्वेऽप्यगजा आच्छिन्नहस्तिनस्त्वया यदैव कृताः । विषमा दुष्टाः सामन्ताः । सकलाश्च ते विषमाश्च सकलविषमाः । तेषामन्तो विनाशः तस्य सिद्धिः सकलविषमान्तसिद्धिः । यदि वा विषमान्ताः प्रत्यन्तभूमयः । तासां सिद्धिः स्वीकरणम् । सा तदैव सकलमहीपत्यगजीकरणकाल एव तव संपन्ना । अयमत्रार्थः । गजबलमासाद्य महीपतयो विषमा भवन्ति । यदा तु त्वया स्वपौरुषेणापहृतहस्तिनस्ते कृतास्तदा तव न कश्चिद्विषमोऽस्तीति ॥

Really, when you made all the lords of snakes (*nūṇamahivaī*) serve as poison-antedotes (*agayā*) that very moment you got mastery of the charm that counteracts all types of snake-poisons (*visa-maṁta-siddhi*). (*Alternatively*) Really when you deprived all the (enemy) kings (*nūṇa mahivaī*) of their elephants (*agayā*), that very moment you got control over all the hostile feudatories (*or* all the unfriendly border territories) (*visamaṁta-siddhi*).

[23] तुह रिउणो णाह सुहत्थिणो वि भद्दत्तणं कह लहंतु ।
जाण दुह च्चेय गई एक्के मंदा मया अण्णा ॥४२

हे नाथ, 'तुह रिउणो' तव रिपोः सम्बन्धिनः सुहस्तिनोऽपि शोभनहस्तिनोऽपि भद्रत्व भद्रजात्युपलक्षितहस्तित्वं कथं लभन्ते येषां 'दुहच्चेय' द्विधैव गतिर्द्वावेव प्रकारौ । काऽसौ द्विधैव गतिरित्याह । एके सुहस्तिनो-

ऽपि मन्दाः मन्दजात्युपलक्षिताः । अन्ये 'मया' मृगाः मृगजात्युउपलक्षिता इति । ननु च भद्रजातय एव सुहस्तिनो भवन्ति । तत्कथ सुहस्तिनोऽपि भद्रत्वं न लभन्त इति युक्तं स्यात्। अत्रोच्यते । मन्दमृगजातिषु गजेषु मध्ये ये नितान्तशोभनास्तदपेक्षया सुहस्तिन इत्युक्तम् । अतोऽयमदोषः । तदयमर्थः । न तावत् तव रिपोः सन्त्यपि सुहस्तिनः, सन्ति चेन्मन्दमृगजातय एव, तेऽपि त्वयाऽपहृताः । सत्करिणां तु भद्रजातीनां देव एव भाजनम् । तथाऽयमपरार्थः । हे नाथ, 'तुह रिउणो' तव रिपवः 'सुहत्थिणो वि' सुखार्थिनोऽपि शुभार्थिनोऽपि वा भद्रत्वं उत्सा[हा]दिमुपयोगलक्षणं शोभनत्वं तत कथं लभन्ते । येषां तव रिपूणां द्विधैव गतिः । काऽसावित्याह । एके मन्दा रागिणोऽन्ये मृतास्त्यक्तप्राणाः । अन्योऽयमर्थः । भवद्भयेन निजनगरमपहाय तव रिपवः सततमनुचितकन्दमूलफलाहारेण ये जातज्वरादिरोगास्ते सुखमर्थयमाना अपि, ये तु मृतास्ते सुखमर्थितवन्तोऽपि, कथं भद्रत्वं लभन्ते । नैव लभन्त इत्यर्थः ॥

O Lord, how even the best of your enemy's elephants can be of the Bhadra species, there being for them scope only for two species ?—some of the e ephant can be Manda (*mamda*), others Mrga (*maya*).

(*Alternatively*) How, O Lord, your enemies, eventhough coveting happiness (or blessedness), can attain welfare, when there are only two fates destined for them : some of them have become sick (*mamda*), while others have died (*maya*) (42).

[24] आयासे अ-ठविंतो वि कुणसि जं सुरयणं पणइ-सत्थं ।
तं विन्नायमउव्वो नरनाह पयावई तं सि ॥४३

प्रसिद्धा हि प्रजापतिः स्रष्टा किल 'आयासे' आकाशे स्थापयतु(?ति) सुरजनं, त्रिदशलोकं करोति सृजति । 'तं पुण आयासे अ-ठविंतो वि कुणसि जं सुरयणं पणति(? इ)-सत्थं', तद् विज्ञातमवगतम्, हे नरनाथ, त्वमपूर्वोऽनन्यः प्रजापतिरसीति । एभिरेव पदैरयमपरोऽर्थः । तद्यथा—'आयासे' खे अस्थापयन्नपि प्रणयिसार्थं 'सुरयणं' सुरत्नं सुष्ठु शोभितानि रत्नानि यस्य 'तं' तत्तादृशं प्रणयिनां सार्थं समूहं यत् करोषि तद् ज्ञातमस्माभिरपूर्वः प्रजापतिः प्रजाना[6B]थस्त्वमसि । अपरो हि

प्रजानाथः स्वल्पधनमपि प्रणयिजनं कुर्वन् महति सेवायासे स्थापयति । त्वं पुनरेनं सुरत्नं करोषि न चायासे स्थापयसि इत्यपूर्वः प्रजापतिरसि ॥

O King, because you make the host of your supplicants *surayaṇa* ('gods', *alternatively*, 'rich in jewels') even without placing them in ā*yāsa* ('heaven', *alternatively*, 'under strenuous service'), I realized that you were a unique Creator (*or* lord of the subjects) (*payāvaī*).

[25] वाएण दूसहेणं कंपाविंतो अहोरणे सुहडे ।
सिसिरो व्व पणइ-कमलाण नाह नालक्खयं देसि ॥४४

'सिसिरो व्व तुमं नालक्खयं देसि' । यथा शिशिरः शिशिरकालः कमलानां नालक्षयं ददाति, तथा हे नाथ,त्वं प्रणयिकमलेभ्यो नालक्षकं न लक्षरहितं ददासि । किं कुर्वन् । सुकंपयन् । 'सुहडे' सुष्ठु 'हडा' वृद्धाः 'सुहडा' तान् सुवृद्धान् । कीदृशान् । 'अहोरणे,' 'होरण' प्रावरणं तद्रहिताः 'अहोरणा' तानप्रावरणान् । दुःसहेन वातेन हिमानिलेन शिशिरः कम्पयति । त्वमपि दुःसहेन सोढुमशक्येन वादेना(?)पि । अहो आश्चर्यम् । 'रणे' संग्रामे सुभटान् कम्पयन् प्रणयिकमलेभ्योऽलक्षकं न ददासीति शब्दश्लेषोपमा ॥

As the winter, making the unclothed (*ahoraṇa*) aged persons (*suhaḍa*) tremble (*kaṁpāviṁto*) due to unbearably cold wind (*vāa*), destroys the lotus-stalks (*nāla-kkhaya*), so you too, O Lord, making the combatants (*suhaḍa*) in the battle (*raṇe*) lie low (*kaṁ pāviṁto*) through your unbearable blows (*vāa*), give to the supplicants not less than a lakh (*nālakkhaya*)—what a wonder (*aho*) ! (44)

[26] पणईण देव दिंतो बहुसो लक्खाइं उत्तुणो कीस ।
पडिवक्खाण वि तुह दिंति गयवरा रयण-कोडीओ ॥४५

'गयवरा' इति गतवरा वररहिताः सामान्यप्राणिनोऽपि यस्य प्रतिपक्षाणामपि रत्नकोटीर्ददति, स त्वं देव, देवत्वादिव स्वयमेव वरसंपन्नो बहुशोऽनेकशो लक्षाणि धनानां शतसहस्राणि प्रणयिभ्यो ददत् 'कीस' कस्मात् 'उत्तुणो' गर्वितः । गतवराणां रत्नकोटयो न सन्ति,

सत्योऽपि कथं प्रतिपक्षेभ्यो दीयन्त इत्युक्तमिति चेत् सत्यम् । किन्तु शब्दश्लेषवशादयमर्थः समायातोऽनुपपन्नोऽपि दर्शनीयः । तथथा — 'गयवरा' गतवरा । 'रयणकोडीओ' रत्नकोटीरिति । अयं तु युक्तोऽर्थस्तयोरेव पदयोर्योऽन्यः । यथा—'गयवरा' गजवराः प्रधाना गजाः प्रतिपक्षेभ्योऽपि 'रयणकोडीओ' रदनकोटीर्दन्ताग्रभागान् ददति । स त्वं रे देव, अनेकशोऽपि लक्षाणि प्रणयिभ्यो जातस्नेहेभ्यो ददानः कस्माद् गर्वितः । यतो यस्य प्रतिपक्षदलनक्षमा गजवराः सन्ति तस्योपनतसकलमहीतलाप्तकरस्य बहुशोऽपि लक्षदाने को गर्वः । तदेतेनानेककोटिदानोचितोऽपि देव त्वमसीत्युक्तं भवति ।

O Lord, how can you take pride in giving frequently several lakhs as gifs to the supplicants (*also*, 'to the loyal persons'.) when even your ordinary subjects with no resources (*gayavarā*) give crores of jewels(*rayaṇa-koḍio*)even to the opponents (*paḍivakkhāṇa*) ? (*alternatively*, 'when your excellant elephants (*gayavarā*) impart with their tusk-ends (*rayaṇa-kodio*) blows to your enemies ?). (45)

**(Index Verse 11)**

'सुसियत्तण'-'बहुलक्खय'-'सिरीस'-'जलदुग्ग'-'वारणारीहिं' ।
गाहाहिं पसंसंतं वादि कहं तं पसंसेमो ॥४६

गाथाभिर्महीपतिं प्रशंसन् हे वादिन्, कथं त्वां प्रशंसामः । प्रशंसायाः पुरोवर्ती भवानित्यर्थः ॥

O Vādin (i.e. Bappabhatti), in what way can we praise you enough for your eulogizing Gāthās that contain (respectively the keywords) *susiyattaṇa*, *bahulakkhaya*, *sirīsa*, *jaladugga* and *vāraṇārīhim* ? (46)

[27] जो अण्णवाणरोहं परं पवण्णो सइ च्चिय नरिंद
मा किर सो तुज्झ जसो पावउ सुसियत्त[7A]णं परम ॥४७

'अण्णवाणरोहं' । अन्नं च पानं च अन्नपाने । तयो रोधो निरोधः अन्नपानरोधः तम् । 'परं' अत्यर्थम् । 'सइ च्चिय' सदैव प्रपन्नः प्राप्तः । स कथं 'सुसियत्तणं' शुष्कत्वं कार्श्यपरममतीव मा प्रापत् । अपि तु शुषितत्वं शोषं प्राप्नोत्येव सः । एतदर्थप्रतिपादिभिः पदैरमीभिरेवायमपरोऽर्थः पृथ्वीपतेर्यशसि योज्यते । यथा 'अण्णवाण रोहं' अर्णवानां रोधः समुद्राणां तटं 'पर'' परभागव्यवस्थितं यत् तव यशः कर्तृ सदैव प्रपन्नं, समुद्राणां परं तीरं यद्गतमित्यर्थः । तद् भो नरेन्द्र तव यशः परममुत्कृष्टं कर्तृ 'सुसियत्तं 'सुष्ठु सितत्वं सुशुक्लत्वं कथं प्राप्नोतु । अपि तु सागराणां परं पारं गतः यशः तव सुसितत्वं प्राप्नोत्येव । संस्कृते नपुंसकमसन्तं प्राकृते पुंल्लिङ्गं भवति । तेन 'सो जसो' इति भवति ॥

O King, your Glory never takes any food or drink whatsoever (*aṇṇavāṇaroham paraṁ*). So how possibly can it not become extremely emaciated (*susiyattaṁ paramaṁ pāvau*) ?

(*Alternatively*,) your glory has reached the farther shore of the oceans (*aṇṇavāṇa roham paraṁ*). So how possibly can it not attain the maximum whiteness (i. e. purity) (*su-siyttaṁ paraṁ aṁ*) ? (47).

[28] बहुलक्खएण बहुसो महा-पसाएण तुज्झ नर-नाह ।
पणइ-समूहो चंदो व्व वंदणिज्जो जए जाओ ॥४८

एकत्र बहूनि 'लक्खं' धनशतसहस्राणि यस्मात् स बहुलक्षको महाप्रसादः अपरत्र बहुलस्य कृष्णपक्षस्य क्षयो बहुलक्षयः । कीदृशः । महान् प्रसाद प्रसन्नता यस्य स महाप्रसादः । तेन बहुशोऽनेकशस्तव नरनाथ प्रणयिसमूहश्चन्द्र इव जगति वन्द्यो जातः । बहुलक्षयेण शुक्लपक्षारम्भेण प्रसत्तिभाजा जगति यथा चन्द्रो वन्द्यस्तथा बहुलक्षकेन बहुशस्तव महाप्रसादेन प्रणयिसमूहो वन्दनीयो जातः ॥

The host of your supplicants, O King, which has frequently received many a lacs (*bahulakkhaya*) and great favours (*mahāpasāya*) from you, has become adorable for the whole world like the moon, which puts an end to the dark half (*bahula-kkhaya*) and produces ever-increasing brightness (*mahā-pasāya*) (48)

[29] अण्णो च्चिय आयारो अन्नो च्चिय पत्थिवाण ववहारो ।
जेण सिरीसो वि तुमं देसि महा-पीलु-पब्भारं ॥ ४९

अन्य एव पार्थिवानां राज्ञां आकारो रूपमन्य एव च व्यवहारः कर्तव्यम् । यदुक्तम् 'अशङ्किताकारमुपैति शङ्कितः' इति । तदिह शब्दश्लेषादेवाकारान्यत्वे व्यवहारान्यत्वं दर्शितं नार्थतः । तद्यथा— पीलोः फलानि तेषां प्राग्भारो निकरस्तं पीलुरेव ददाति न शिरीषः । त्वं पुनः 'सिरी' श्रीः तस्या ईशोऽपि श्रीपतिरपि महापीलूनां महाहस्तिनां प्राग्भारं ददासि इत्यनेनार्थेनाकारोचित एव व्यवहारः । यतो यः श्रियामीशः श्रीशो भवति स महाकरिणां समूहं दद्यात्येव ॥

(It seems that) the kings have one kind of appearance and quite a different kind of behaviour ; for eventhough you are *sirīsa* ('the Śirīsa tree'; *alternatively*, 'the lord of wealth').' you give a huge quantity of *pīlu* ('the Pīlu fruits'; *alternatively*, 'elephants'). (49)

[30] संपुण्ण-कोस-दंडं जल-दुग्ग-गयं पि दलइ कमल-वणं ।
दिट्ठम्मि जम्मि कह सो सूरो मा भुवणमक्कमउ ॥ ५०

कोशो भाण्डागारो दण्डोऽर्थार्जनहेतुरुपायः । अन्यत्र कोशो गर्भो दण्डो नालम्, तौ संपूर्णौ यस्य तत् संपूर्णकोशदण्डम् । जलदुर्गं गतम् । एवं जिगीषुधर्मोपेतं कमलवनं, क्रमलवनं वा क्रम न्यायं लुनाती(7B)ति क्रमलवनं न्यायच्छेदि शत्रुवृन्दम्, यस्मिन् दृष्टे सति दलति भिद्यते स 'सूरो' भानुः, शौर्ययुक्तो वा शूरः राजा कथं मा भुवनमाक्रामतु । जिगीषुधर्मोपेतमपि विचारयन्नाक्रामत्येव स भुवनम् । जलदुर्गगत-मित्यर्थश्लेषः । संपूर्णकोशदण्डमिति शब्दश्लेषः ।

At whose sight the mass of lotuses *(kamala-vaṇa)*, complete with their stalks and calypses *(sampuṇṇa-kosa-daṁḍa)* open up *(dalati)* eventhough it is surrounded by water *(jala-dugga-gaya)*, how can that sun *(sūra)* not overpower the whole world ?

*(Alternatively)* At whose sight a recalcitrant adversary, eventhough equipped fully with rich treasury and army *(sampunna-kosa-damda)* and taking refuge in a fort surrounded by water-filled moats *(jala-dugga-gaya)*, breaks up *(dalati)*, how can that hero *(sūra)* not overpower the whole world ? (50)

[31] तं पि हु अच्छिन्न-सिरिं सेविज्जइ तं पि वारणारीहिं।
तुह कडया रिउ-नयरस्स भिज्जए नाह न तिलो वि॥५१

हे नाथ, तव कटकाच्छिबिरात् सकाशाद्रिपुनगरस्य तिलोऽपि भेदः नास्तीत्यर्थः। कथमित्याह। यस्मात्तदपि रिपुनगरम्, 'अपि'शब्दात् कटकमपि, अच्छिन्नश्रि। एकत्र दुष्प्रवेशविपुलविपिनीभूतभूमित्वेन जनसंचारविरहादच्छिन्ना अविदारिताः श्रियो बिल्वतरवो यस्मिन् रिपुनगरे तत्तथा। अन्यत्र अच्छिन्ना प्रवर्धमाना श्रीर्लक्ष्मीर्यस्य त्वत्कटकस्य तत्तथा। पुनः सेव्यन्ते तदपि अरिपुरं त्वत्कटकं च 'वारणारीहिं' इत्येकं वारणानां हस्तिनामरिभिः सिंहैरपरं वारनारीभिर्वारस्त्रीभिः सेव्यत इति सम्बन्धः।

O Lord, the enemy's city does not differ by a jot from your military camp : both of them are *acchinna-siri* (the former is sequestered and so the approach to it is covered with *bilva-trees not cut off*; the latter has its *(undiminished glory)*, and both of them are frequented by *vāraṇāris* (the former by *lions*, the latter by *courtesans*). **(51)**

गाथाकोशकारः कविं स्तौति—

**(Index Verse 12)**

'सव्व-गयस्स' 'स-जीवे' 'अंतेउरियाउ' 'नेय सद्दहियं'।
एयाहिं सुगाहाहिं वाइ अगाहो कहं सि तुमं॥५२

'सव्व-गयस्स' इत्यादिभिः सुगाथाभिरपि सतीभिर्हे वादिन् बप्पभट्टे 'अगाहो' अगाथो गाथारहितः। कथं त्वमसीति विरोधः। तदत्र शब्दविरोध

एष नार्थविरोधो यस्मादेताभिः सुगाथाभिः अगाधो गाम्भीर्यप्रतिपादकत्वाद् भवसीति नार्थविरोधः ॥

O Vādin (i.e. Bappabhatti), how can you be *agāha* (1. 'with no Gāthās to your credit', *alternatively*, 2. 'unfathomably rich in meaning') despite these excellent Gāthās, viz. (those with the keywords) *savva--gayassa, sa-jīve, amteuriyāu* and *neya saddahiyam ?* (52)

[32] सव्व-गयस्स विवासो रिउ-वहु-नयणेसु तुह पहु जसस्स।
ताण घणंजण-विगमेण जेण सो होइ धवलयरो ॥५३

सर्वगतस्यापि व्यापिनोऽपि तव यशसो [वि]वासो विशेषेण निवासो रिपुवधूनयनेषु शत्रुस्त्रीलोचनेषु । कथमेतदवगम्यत इत्याह । येन कारणेन 'ताण' तेषां घनाञ्जनविगमेन बहलाञ्जनस्य विरहेण त्वद्-यशो धवलतरमतिशयेन धवल भवति । अयमत्रार्थः । यो यत्र तिष्ठति स तस्मिन्नाधारे मलोपहते मलिनो भवति । ततस्तु मले गलति समुज्ज्वलो भवति । त्वत्कृपाणनिपातितपतिनां तव रिपुवधूनामनवरले-रोदनाश्रुसंततिधौतमञ्जनं नयनेभ्यो यथा यथा गलति तथा तथा तव यशो धवलतरं भवति ॥

O Lord, eventhough your fame has spread everywhere, it has its favorite residence in the eyes of your enemies' wives, because it shines there with greater whiteness due to the disappearance of the thickly applied *kohl* (it having been washed away by ceaseless weeping). (53)

[33] नूणं धणुम्मि तुह पहु संकमइ विवक्ख-जीवियं समरे ।
इह[8A]रा तम्मि स-जीवे कह रिउणो हुंति अजीवा॥५४

नूनं मन्ये, तव प्रभो धनुषि चापे विपक्षजीवितं संक्रमति समरे । 'इहरा' इतरथा यदि विपक्षजीवितं तत्र न संक्रामति तदा तस्मिन् धनुष कि सजीवे जीवा ज्या मौर्वी तया सह वर्तते इति सजीवं सज्यं समौर्वीक-मिति याव । तस्मिन् सजीवे सज्ये धनुषि समरे समारोप्यमाणगुण

एव तव रिपवो भयेन त्यक्तजीवा भवन्ति । ततस्तेन तज्जीवेन तव धनुः सजीवं सज्यं भवतीति मन्ये ।

O Lord, it seems, in the battle your enemies' life passes over to your bow (and lives there); otherwise, how can the enemies become lifel ss *(ajjīva)*, the moment the bow is strung *(sajīve)* ? (54)

[34] बहुसोहग्गाउ अ-विहवाओ वट्टंति तुज्झ वेरीणं ।
किं अंतेउरियाओ न हु न हु नरनाह नयरीओ ॥५५

हे नरनाथ 'बहुसोहग्गाओ अविहवाओ' तव रिपूणां वर्तन्ते किमन्तःपुरिकाः । न हि । कास्तर्हि इत्याह । 'नयरीओ' नगर्यः । कथम् । उच्यते । 'बहुसोहग्गाओ' बहुशो भग्ना उद्वसत्वात् । तथा 'अविहवाओ' अविभवाः त्वदरीणां नगर्यो वर्तन्ते । न तु बहुसौभाग्या अविधवाश्च तदन्तःपुरनार्यः किन्तु गलितसौभाग्या हतभर्तृकाश्चेति ॥

'O King' *bahusohaggā* and *avihavā* are your enemies' ....'

'Do you mean their queens (are having very bright fortune and their husbands alive) ?'

'No, no, I mean their cities (are destroyed frequently and they are quite bereft of glory)'. (55)

[35] तं कुणसि भीम-साहस-लंघिय-नय-देव्व पुरिसयार-पहं ।
जं अणुहविज्जमाणं पि तीरए नेय सद्दहिउं ॥५६

भो भीमसाहसलङ्घितनयदैव भीमसाहसेन लङ्घितो नयदैवो येन स तथा तस्य संबोधनं हे भीमसाहसलङ्घितनयदैव. त्वं पुरुषकारपथम् पौरुषमार्गं करोषि । यः पुरुषकारपथोऽनुभूयमानोऽपि तीर्यते शक्यते नैव श्रद्धातु प्रतिपत्तुम् । त्वत्पुरुषकारो जगति प्रसृत इत्यनुभूयते, लोकातीत इति न श्रद्धीयत इत्यर्थः ॥

By disregarding the dictates of policy as well as destiny by means of your terrific bravery, you are chalking out a path of personal endeavour which, eventhough it is actually experienced, seems unbelievable. (56)

(Index Verse 13)

'अवरिट्ठिय-लीहं' ति य 'चक्कयरेणं' ति तह य गाहाओ ।
वंकाओ वि अ-वंकाउ वाइ तो कह णु घडियाओ ।।५७

गाथे द्वे 'वंकाओ वि' वक्रोक्त्या भणिते । 'अवंकाउ' अपङ्के पङ्करहिते निर्मलार्थे इति यावत् । ते तादृश्यौ गाथे वादिनाऽऽचार्येण कथं नु घटिते इति शब्दविरोधः ।।

O Vādin (i e. Bappabhaṭṭi), how did you compose such Gāthās (with the keywords) '*avariṭṭhiya-līhaṁ*' and '*cakkayareṇaṁ*' which are *avaṁka* ('not *vaṁka*', alternatively, 'lucid') in spite of being *vaṁka* ('possessing the quality of *vakratā*, i e oblique mode of expression')? (57)

[36] अव्वो तुमाइ जं-पिच्छएण तं किं पि एत्थ ववहरियं ।
अवरिट्ठिय-लीहं जेण देइ पढमं तुहं लोओ ।।५८

'अव्वो' इत्याश्चर्ये । 'तुमए' त्वया 'जंपि(?पि)च्छएण' यत्-प्रेक्षकेन यत्किञ्चिद्दर्शिना तत् किमप्यत्र व्यवहृतम् । अवरिट्ठिय-लीहं' अप्रतिष्ठितरेखां अप्रतिष्ठितेषु प्रतिष्ठारहितेषु मध्ये प्रथमां रेखां येन तव ददातीति निन्दा । न वा 'ज' इति यद् यस्मात् प्रेक्षकेन पर्यालोचकेन सता त्वया तत् किमप्यत्र परत्र[8B]क्व तत्र जगति व्यवहृत-मनुष्ठितम् येनानन्यगामिना व्यवहृतेन 'अवरिट्ठिय-लीहं' उपरिस्थित-रेखामुपरिस्थितानामुच्चपदस्थानां मध्ये तव रेखां प्रथमां जनो ददातीति स्तुतिः ।।

Oh! being covetous of whatever you saw (*jaṁ-picchaeṇa*) you behaved in such an (unspeakable) manner that people count you as the foremost of notorious persons

(*Alternatively*) Oh, as a critic (*jaṁ picchaeṇa*) you functioned in such a manner that people count you as the foremost among the eminent. (58)

[37] हा हा संतं पावं नरिंद डज्झंतु ताण वयणाइं ।
चक्कयरेण वि हरिणा समत्तणं जे उ पयडंति ॥ ५९

'हा हा' कष्टं, 'संतं' सद्भि[द्य]मानं पापमिदं तथा दह्यन्तां तेषां नृणां वचनानि वदनानि वा । तेषां केषामित्याह । 'चक्कयरेण वि' चक्रं करे यस्य । चक्रस्य वा अरं चक्रारं । चक्रचरो वा कुलालादिस्तेन चक्रारेणापि, चक्रचरेणापि वा हरिणा विष्णुना, हे नरेन्द्र, तत् तव परमेश्वरस्य ये साम्यं प्रकटयन्ति वदन्ति तेषां वचनानि दह्यन्ताम् ।

Ah! God forbid the evil! O King, may the mouths of those persons be scorched, who try to compare you with Viṣṇu even-though he is associated (like a potter) with the *cakra* ('wheel', *alternatively*; 'discus'). (59)

(Index Verse 14)

'गयवइ' 'सुमेह' 'सुन्देर' 'सूर' 'कलि' 'कंचुइ' त्ति 'मयणो' त्ति ।
गाहाउ जिणंति जयं गयवइ तुह सत्त साराओ ॥ ६०

गाथाः सप्त साराः सारार्थाः तव हे गजपते जगज्जयन्ति । अन्योऽपि यः सप्तभिः स्वाम्यमात्यादिभिः सारो भवति स जिगिषुर्जगज्जयति ॥

O Gayavai (Sk. Gajapati i. e. Bappabhaṭṭi), your seven Gāth-s namely (those having) *gayavai, sumeha, suṁdera, sūra, kaṁcui* and *Mayaṇo* (respectively as their keywords), being richly meaningful, conquer the world (just as a king with all the seven strong 'limbs' conquers the world). (60)

[38] उव्वहसि कीस गव्वं एत्थ जए गयवई अहं एक्को।
तुह वेरियाण नरवर महिला सव्वा वि गयवइणो ॥६१

उद्वहसि कस्माद् गर्वं यथाऽत्र जगत 'गयवई' गजपतिरहमेक इति । यतस्तव वैरिणां हे नरवर, महिलाः सर्वा अपि 'गयवइणो' गत-पतयो गतभर्तृका इति यावत् । 'गजपति'-'गतपति'-शब्दयोः 'गयवइ' इति शब्दसाम्यादेवमुच्यते ॥

Why do you cherish pride that in this world I am the one and only *gayavai* ('owner of the most excellent elephants') ? O great man, all the wives of your enemies also are *gayavai* ('have their husbands killed'). (61)

[39] अव्वो सुमेह तइं किं पि तं कयं जेण विणडियं गयणे ।
धारासय-ण-पहुप्पंत-चंचुयं चायय-कुडुंबं ॥६२

'अव्वो' आश्चर्यम् । हे सुमेध, त्वया सकलदिगाभोगस्थगनोन्नमन-गर्जनप्रवर्षणादिकप्रकारैर्विचिन्त्य किमपि तत् कृतं येन धाराशतेषु न 'पहुप्पंती' अपर्याप्ताः चञ्चवो यस्य तद् धाराशतापर्याप्तचञ्चुकं सच्चातककुटुंबं गगने नभसि विनटितमितस्ततो धाराग्रहणेन व्याकुलीकृतमित्यर्थः ॥

O noble cloud, what a wonder! You did such an extraordinary thing that the Cātaka family, unable to cope with their beaks with the hundreds of streams (you showered), was flurried. (62).

[40] सुंदेर-तुलिय-कंदप्प तुज्झ णिव्विग्घ-दंसण-मणाओ।
परिवाडि-निमिसणं लोयणाइं सिक्खंति तरुणीओ॥६३

'सुंदेर' सौन्दर्यं सुरूपता तेन तुलितः समीकृतः कन्दर्पः कामो येनासौ सौन्दर्यतुलितकन्दर्पः । तस्य संबोधनं सौन्दर्यतुलितकन्दर्प नरपते, निर्विघ्नेक्षणं चक्षुःपक्ष्मसंकोचकृतान्तरायरहितं यत्तव दर्शनं तत्र निर्विघ्नदर्शने मनश्चेतो यासां ता निर्विघ्नदर्शनमनसः सत्यः तरुण्य परिपाट्या क्रमेण निमेषणं पक्ष्मसंकोचनं लोचनैः शिक्षन्त्यभ्यस्यन्ति । शिक्षावशादेकतरचक्षुषि पक्ष्मसंकोचे संचारिते परेण चक्षुषा पक्ष्मसंकोचविरहान्निर्विघ्नं त्वां पश्याम इति तास्तच्छिक्षन्ति ॥

Desirous of getting uninterrupted view of yours, who equals the God of Love in beauty, damsels practise closing their two eyes in turn—one at a time. (63)

[41] फुरिय-पयावस्स तुहं सव्वरिउम्मूलणं कुणंतस्स ।
सोहंति सूर महिहर-सिरेसु परिसंठिया पाया ॥ ६४

स्फुरितप्रतापस्य 'तुह' तव 'सव्वरि-उम्मूलण' शर्वरी रात्रिः तस्या उन्मूलनं निर्नाशं कुर्वतः सतो हे सूर्य, हे भानो, महीधरशिरस्सु गिरिशिखरेषु परिसंस्थिताः पादाः किरणाः शोभन्त इत्येकोऽर्थः। तथा हे 'सूर' शौर्ययुक्त, स्फुरितो दीप्रस्तापो जगदाक्रमणशक्तिर्यस्य स तथा तस्य स्फुरितप्रतापस्य 'सव्व-रिउन्मूलणं' सर्वरिपून्मूलनं कुर्वतः महीधरशिरस्सु राजमूर्धसु परिसंस्थिताः प्रतिष्ठिताः पादांश्चरणास्तव हे 'सूर' शौर्यनिधे, शोभन्ते ॥

O Sun, destroying the night and scientillating hotly, your rays planted on the mountain peaks appear beautiful.

(*Alternatively*) O hero, uprooting the enemies and exerting prowess, your feet planted on the heads of kings appear glorious. (64)

[42] तं परिवड्ढंति दढं खणं पि निवसंति जत्थ सप्पुरिसा ।
जाआ कलिम्मि जस्सिं तइं उण सा सा चेय निट्ठविआ॥६५

यत्र स्थाने सत्पुरुषाः क्षणमपि निवसन्ति तद् दृढं परिवर्धयन्तीति न्यायः । जातोऽसि यस्मिन्नेव कलौ काले त्वया पुनः सत्पुरुषेणापि स एव कलिर्निष्ठापितः क्षयं नीतः । निन्दास्तुतिः ॥

That locality where good men stay even for a while is made by them highly prosperous. You, however, eventhough born in the Kali age, have destroyed the same. (65)

[43] दढ-पडिवण्णंतेउर-रक्खा-वावारमज्ज कंचुइणो ।
निंदंति निरत्थय-वित्ति-भुंजया तुज्झ सोहग्गं ॥६६

निन्दन्ति दूषयन्ति । कीदृशम् । दृढं निश्चितं प्रतिपन्नः प्राप्तः साधितोऽन्तःपुररक्षाऽव्यापारो येन तत्तया । के ते निन्दन्ति । 'अज्ज कंचुइणो' हे आर्य, स्वामिन्, कञ्चुकिनो महल्लकाः । कीदृशाः सन्तो निन्दन्ति तदित्याह । 'निरत्थयवित्तिभुंजया' निरर्थिकां निःप्रयोजनां वृत्तिं जीवनं भुञ्जत इति निरर्थकवृत्तिभोजकाः । एतदुक्तं भवति । यदा तु परमसौभाग्यभाजनं भवन्तमनन्यगतचित्तया स्वयमेव परित्यक्तचापल्यमन्तःपुरं तवैव समागममभिलषत् सततमभिध्यायति । तदैतदीयसौभाग्येनैवान्तःपुरस्त्रियो रक्षिताः माऽस्माभिरिति निरर्थकां वृत्तिं भुञ्जानाः कञ्चुकिनस्तव सौभाग्यं निन्दन्तीति ॥

O noble one, the chamberlains, having undrtaken devotedly the duty of guarding your harem, blame your loveliness, becaues it makes them draw their emoluments, without allowing them any scope for rendering service. (66)

पुनरपि नरपतेः सौभाग्यं वर्णयति 'तइ' इत्यादिना—

[44] तइ दिट्ठे वियलिय-रूव-मित्त-रइ-चित्त-रंजणासंघो ।
मयणो वि नियय-सत्थत्थ-पालणा-संठलं पत्तो ॥६७

त्वयि दृष्टे स[9B]ति मदनोऽपि कामोऽपि 'नियसत्थत्थ-पालना-संठलं पत्तो' । मदनस्य निजशास्त्रं करणालिङ्गनादिविशेषविधिना स्त्रीवशीकरणं तस्य पालनाऽनुष्ठानं तया निजशास्त्रार्थपालनया । 'संठलं'—संठलमिति सामान्यभाषापदं न संस्कृतोत्थम् । तं निजशास्त्रार्थपालनाषण्ढत्वं प्राप्तः । कीदृशः सन् । विगलितं रूपमात्रं यस्यासौ विगलितरूपमात्रः । स चासौ रतिचित्तरञ्जनासंङ्गश्च विगलितरूपमात्ररतिचित्तरंजनासङ्गः । रतिस्तत्पत्नी । तस्याश्चित्तं तस्य रञ्जनं । तत्र 'आसंघा' अभिलाषा यस्य स तथा । एतदुक्तं भवति । स्त्रीयो हि रूपवति पुरूषे रज्यन्ते । कामश्च विगलितरूपोऽनंगः । पत्नीनां च रतिरेकैव वल्लभा ।

त्वं च रूपातिशययुक्तः । ततो मामरूपं परित्यज्य रतिरियं राजानमिमं रूपातिशयशालिनं मा गादिति भीतोऽसौ त्वयि दृष्टे रतिचित्तरञ्जनार्थं कामः कामशास्त्रोक्तवशीकरणकारणकरणालिङ्गनादेरनुष्ठानेन 'संठलं' षण्ढत्वं प्राप्तः ॥

Seeing you, even the God of Love, being bodiless and hence keenly desirous of winning over Rati's heart, proved totally ineffective in practising the implications of his own preachings. (67)

(Index Verse 15)

आमोइय-सुमणाए कोमल-वण्णाए बप्पभट्टिस्स ।
'असमंजस' त्ति गाहा-लयाए छाय च्चिय अउव्वा ॥६८

आसमन्तान्मोदिताः प्रहर्षिताः सुमनसः पण्डिता यया साऽऽमोदितसुमना गाथा । अन्यत्र आमोदः परिमलो विद्यते यासां ता आमोदिका आमोदवत्यः (?) सुमनसः पुष्पाणि यस्याः सा आमोदिकसुमना लता । तथा कोमला मनोहारिणो वर्णा अक्षराणि यस्यां सा कोमलवर्णा गाथा । अन्यत्र कोमलानि मृदूनि पर्णानि पल्लवरूपाणि यस्याः सा कोमलपर्णा लता । प्राकृते पकारस्य वत्वे कृते 'कोमलवण्णा' इति सदृशं रूपम् । गाथा लतया रूप्यते गाथैव लतेति । तेनायमर्थः । आमोदितसुमनसः कोमलवर्णायाः कोमलपर्णायाश्च बप्पभट्टेः सम्बन्धिन्या 'असमंजसे'त्यादिगाथायाः छायैवापूर्वा लोकातिवर्तिनी । छाया शोभा वा तापाभावश्चेति श्लिष्टकमिदम् ।

Bappabhatti's Gāthā, containing the keyword '*asamaṁjasā*' is like a creeper: As a creeper with its fragrant flowers (*āmoiya-sumaṇā*) and tender leaves (*komala-vaṇṇā*) has incomparable beauty, so that Gāthā also completely delighting the connoisseur (*āmoiya-sumaṇā*) and full of soft sounds (*komala-vaṇṇā*) has incomparable beauty. (68)

निन्दासदृशाक्षरैः स्तुतिः निन्दा तावद् यथा—

[45] कह नाम न होसि तुमं भायणमसमंजसस्स नरनाह ।
निच्चं च्चिय कुणमाणो जहिच्छमत्थाण-विणिओगं ॥६९

कथं नाम न भवसि त्वम् । कीदृशः । भाजनम् । कस्य । असमञ्जसस्य अयुक्तस्य । किमाचरन् । नित्यमेव सदैव कुर्वाणः । किं तत् । 'जहिच्छमत्थाणविणिओगं' । यथेष्टमिच्छामनतिक्रमेण (?) अस्थानेऽनुचितवस्तुनि विनियोगस्तम् । यदि वाऽस्त्राणामायुधानां विनियोगस्तम् । यदि वा आस्थानस्य सभाया विनियोगमास्थानविनियोगमास्थानदानमित्यर्थः । राज्ञो हि प्रत्येकमष्टधाविभक्तरात्रिंदिवस्यास्थानकालो नयतम् । सदैव तु यथेष्टमास्थानविनियोगं कुर्वन् राजा कथमसमञ्जसभाजनं न स्यादित्येभिरेवाक्षरैस्त्यागातिशयसूचनादस्य स्तुतिः यथा—हे नरनाथ कथं नाम 'भायणमसमं' भाजनमसममतुल्यं 'जसस्स' यशसो न भवसि । किमाचरन् । नित्यमेव प्रतिदिनमेव 'अत्थाण विणिओगं' अर्थानां माणिक्यादीनां यथेष्टमिच्छानुसारेण विनियोगं दानं कुर्वाणः । यो हि नित्यं यथाभिलषितमर्थिष्वर्थानां धनानां विनियोगं दानं करोति स कथमसममसाधारणं भाजनं पात्रं यशसो न भवति । अपि तु भवत्येव ॥

O King, as you are always giving to undeserved persons according to your pleasure (*jahicchamatthāṇa viṇiogaṁ*), how you cannot but be a resort of improper conduct (*asamaṁjasassa*) ?

*(Alternatively)* O king, as you are always giving away wealth as much as desired (*or*, 'you are using weapons with complete mastery', *or* 'you are holding the assembly as desired') *(atthāṇa viṇiogaṁ* or *atthāṇa–viṇiogaṁ*), how you cannot but be an incomparable receptacle of fame (*bhāyaṇamasamaṁ jasassa*) *? (69)*

**(Index Verse 16)**

'अणचिंतिय'-'समचित्ता'-'निय-हियय-पयारण' त्ति 'महिल' त्ति ।
'कुल-बालिय' त्ति गाहाण गयवई चेव मुणियत्थो ॥७०

['अणच्चिंतिय' इत्यादि।] 'समचित्ता' इत्यादि। 'णियहियय' इत्यादि। 'महिले'ति कुलबालि'के'ति च गाथानां गजपतिरेव श्रीबप्पभट्टिरेव ज्ञातार्थः। सूक्ष्मत्वात् ॥

Gujapati (i.e. Bappabhatti) alone knows the meaning of the Gāthās (with the keywords) '*anacimtiya*', '*sama-cittā*', '*niya-hiyaya-payārana*', '*mahilā*' and '*kula-bāliyā*'. (70)

[46] अणचिंतियमुणंती[1] चिंतिय-करणेण[2] तस्स मण-खेयं।
काय्व्वेसु कुणंती न-याणिमो कत्थ वच्चिस्सं ॥७१

'अणच्चिंतिय' अचिन्तितम्। 'अमुणंती' अजानती। कर्तव्येषु मध्ये चिन्तितानि तस्य भर्तुरिङ्गितज्ञतया अवगम्य तेषां करणं संपादनं चिन्तितकरणम्। तेन तावत् भर्तुश्चिन्तितमात्रकरणेन खेदमपरितोषमहं कुर्वती वहंति न जाने क्व व्रजिष्यामीति। कुलबालिकायाः भर्तरि भक्त्यतिशयं दर्शयति ॥

Failing to divine what he has not yet conceived and carrying out (by divining) only that which he has (just) conceived, I feel depressed in heart and do not know where to go. ( 71 )

[47] सम-चिताइ वि घरिणीए भत्तुणा सह इमो विसंवाओ।
सो सामिणि ति तं मुणइ किंकरं सा वि अप्पाणं ॥७२

यद्यद् भर्ता समादिशति करोति वा तत्तदाचरन्ती समनुमन्यमाना च मनागपि मनोभेदं न भजतीति समचित्ता। तस्याः समचित्ताया अपि भर्त्रा सह गृहिण्या अयमेव विसंवादः चित्तभेदलक्षणो यदुत स भर्त्ता स्वामिनीं तां मन्यते, साऽपि गृहिणी तस्य किङ्करमात्मानं मन्यते। इत्यनेन परस्परमनुरागातिशयः कथितो भवति ॥

---

1. अणचिंतीय.°
2. चिंतीय.

Although the wife's mind is in complete concord with her husband's, there is this single point of discord : He considers her to be the ruling mistress, while she believes herself to be his servant. *(72)*

[48] जह से ममम्मि तह मह न तम्मि नेहो त्ति दोहिं वि जणेहिं ।
निय-हियय-पयारण-दुत्थिएहिं झीणं मुह च्चेय ॥७३

यथा 'से' तस्य भर्तुः 'ममम्मि' मयि स्नेहः प्रीतिः, तथा [न] 'मे' मम 'तम्मि' तस्मिन् भर्तरि स्नेह इति गृहिणी स्वहृदयं प्रतारयति । यथा भर्ताऽप्येवमेव यथा 'से' तस्याः ममो[10B]परि स्नेहः तथा मे न तस्याम् । इति द्वाभ्यामपि जनाभ्यां भर्त्रा गृहिण्या च निजहृदय-प्रतारण दुःस्थिताभ्यां क्षीणं मुधैव वृथैव । अयमत्रार्थः । तयोरन्योन्य-मनुरागवशाददृष्टव्यलीकयोः सम एव स्नेहः । केवलमितरेतरमसाधारण-भक्तिभरपराधीनतया यादृशमसौ मयि स्नेहं करोति, न तादृशमहमत्रेति निजहृदयस्य प्रतारणेन वञ्चनया दुःस्थितयोः तयोः वृथैव शरीरशोषो जात इति ॥

'My love for him is not as deep as his for me'—thus deceiving their hearts and becoming miserable, both of them withered in vain. (73)

[49] किं सहि फुडं तह च्चिय किं वा नयणाण एस मह दोसो ।
जं तस्स समीवे अमहिला वि महिल त्ति पडिहाइ ॥७४

किं सखि स्फुटं तथैव किं वा नयनयोरेष मम दोषः, यत्तस्य भर्तुः समीपे अमहिला अपि पुरुषोऽपि महिलेति स्त्रीति प्रतिभाति प्रतिभास्ते मम । अयमस्यार्थः । पुरुषो हि सौभाग्यादिगुणोपेततया युवतेरभिलाषं जनयति, न स्त्री । तेनैवं नाम सा भर्तरि भक्ताऽनुरक्ता च यदेनं पश्यन्ती पुरुषमप्यपरं युवतिरिति पश्यति । तेनैवं सखीमभि-दधत्यास्तस्याः पतिव्रतत्वमनुरागश्चासाधारणो भर्तरि कथितो भवति ॥

Friend, is it really so or is there some defect in my eyesight that in his presence even males appear like females ? (74)

[50] जं जं करेइ दइओ तं तं चाडु त्ति मण्णमाणीणं ।
कुल-बालियाण रोसो न लहइ हिययम्मि ओवासं ॥७५

यद्यदपराधरूपमपि करोति दयितो वल्लभः तत्तच्चाटुरिति मन्यमानानां कुलबालिकानां कुलस्त्रीणां रोषः कोपो हृदये चेतस्यवकाशं अवस्थानं न लभते । अपराधमननं हि रोषहेतुः । यदा तु कुलोद्गतत्वादेव कुलस्त्रियोऽपराधमपि चाटुरिति मन्यन्ते, तदा रोषो न तासां हृदये पदमवाप्नोतीति भावार्थः । विनोदहेतुरुपचारश्चाटुरिति ॥

Whatever is done to them by ther dear one is taken by the ladies of noble families to be their pleasing flattery. The anger does not therefore get any scope at all in their hearts. (75)

(Index Verse 17)

'अहरट्ठाण'- 'धणुव्वेय'- 'नयण-पडिमा' य 'पियसइ तुमं' ति ।
'भायइ'-'मंजूसंजण-''चमरमसोअ' त्ति 'सुअणु' त्ति ॥७६

गुणि-हियएसु इमाओ हार-लयाओ गुणानुराएण ।
विणिहित्ताउ समुज्जल-सुवण्ण-रयणेण पयएण ॥७७

'अहरट्ठाण' इत्यादयो या दश गाथास्ता एव हारलताः हारयष्टयो गुणानुरागेण श्रीबप्पभट्टिना गुणिनां हृदयेषु निहिताः । कथं गाथानां हारलताभिः साम्यमित्याह 'समुज्जले'त्यादि । सम्यगुज्ज्वला, सुश्लिष्टवर्णवाचिनी सुवर्णानां शोभनाक्षराणां रचना सन्निवेशो यस्मिंस्तत्समुज्ज्वलसुवर्णरचनं प्राकृतम् । तेन समुज्ज्वलसुवर्णरचनेन 'पयएण' प्राकृतेनोपलक्षिता गाथा गुणिहृदयेषु गुणिचेतस्सु निहिताः । तथा समुज्ज्वलानि सुवर्ण रत्नानि च यस्मिन् पदके तत्तथा । तेन पदकेन । समुज्ज्वलममलं सुवर्णं सुरूपं यद्रत्नं तेन । कीदृशा । 'पयएण' पयोजेन । पयसि जले जातं तेन, समुद्रोत्पन्नेन मुक्ताफलेनेत्यर्थः । जातावेकवचनम् । तेन । समुज्ज्वलसुवर्णरत्नैः पयोजैरुपलक्षिता हारलताः । अथवा सुवर्णो

हेम । इन आदित्यः । इनवदिनाः प्रकाशरूपत्वात् रत्नान्येव इनाः । सुवर्णं च रत्नेनाश्च सुवर्णरत्नेनाः । यदि वा रत्नानामिनानि प्रधानानि रत्नेनानि मुक्ताफलादिविशेषाः । सुवर्णं च रत्नेनानि [च] तेषां प्रचयो निवहः । समुज्ज्वलश्चासौ सुवर्णरत्नेनप्रचयश्च । अतस्तेन समुज्ज्वल-रत्नेनप्रययेन उपलक्षिता हारलता गुणानुरागेण गुणानुरक्त्या गुणिहृदयेषु गुणिनां वक्षस्सु केनापि स्थाप्यते । ताभिरिदानीं गाथा रूपयित्वा गुणिहृदयेष्वित्यादि श्लेषेण योज्यमिति ॥

The Gāthās (with the keywords) '*aharaṭṭhāṇa*', '*dhaṇuvveya*', '*nayaṇa-paḍimā*', '*viyasai tumaṃ*', '*bhāyai*', '*maṃjūsā*', '*aṃjaṇa*', '*camara*', '*asoa*' and '*suaṇo*', brilliant due to being composed in Prakrit in (words of) beautiful sounds, have been planted by Guṇānurāga (i.e. Bappabhaṭṭi) in the hearts of the connoisseurs, like someone who, out of love for merits, places on the chest-region of the person of merits, beautiful necklaces that have pendants brilliant with gold and gems (*or* 'that have brilliant gold, gems and pearls'). (76-77)

तइयच्छि-सिहि-सिहा-भासुरेण भुवणे हरेण अक्कंते ।
अहरट्ठाणे तुह सुयणु वसइ निरुवद्दवमणंगो ॥७८

विशेषेण हि कामस्तरुणीनामधरमधितिष्ठति । तद्दर्शनाद् यूनां तत्स्थैः कामेषुभिर्भिद्यमानत्वादिति स्वभाव एवायम् । कविस्तु शब्दश्लेषेणोपपत्त्यन्तरमुपलक्षयन्नेवमाह । अधरस्थानमिति प्राकृते 'अहरट्ठाणं' इति भवति । तेनायमर्थः । तृतीयेऽक्षिण शिखिशिखाभिर्वह्निज्वालाभिस्तृतीयाक्षिशिखिशिखाभासुरेण करालेन हरेण रुद्रेण भुवने जगत्याक्रान्ते व्याप्ते सतीति स हरस्थानाद् भीतोऽनङ्गः कामः 'तुह' सुतनु तव 'अहरट्ठाणे' अधरस्थाने हररहिते च स्थाने निरुपद्रवं निराशङ्कं वसति ॥

O damsel of the tender frame in this world the God of Love assailed by Hara who was resplendent with the flames of fire issuing from his third eye, lives undisturbed in '*ahara-ṭṭhāṇa*' (the region of your lower lip'; *alternatively*, 'a place inaccessible to Hara'). (78)

[52] सुहउ त्ति जियइ विद्धो मरइ अविद्धो तुहच्छि-बाणेहिं ।
इय सिक्खविया केण-वि अउव्वमेयं धणुव्वेयं ॥७९

सर्वेणापि शिक्षितधनुर्वेदेन बाणैर्यो विद्धः स सुहत इति कृत्वा म्रियते । यः पुनरविद्धः स जीवति । सुतनोस्तु प्राकृतपरिनामापादित-समरूपशब्दच्छलेनापूर्वा धनुर्वेदशिक्षा दर्शयति यथा—सुतनो तवाक्षिबाणा-भ्यां विद्धः 'सुहउ' त्ति सुभग इति जीवति, म्रियते तु ताभ्यामविद्ध इति शिक्षिता केनापि त्वमपूर्वमेनं धनुर्वेदम् । अयमयत्रार्थः । यस्त्वया सुभग इति दृष्टः स परितुष्टो जीवति । यस्तु दुर्भग इति त्वया नावलो-कितः स आत्मानमधस्तु(? न्यं) मन्यमानो म्रियते ।

He who in pierced with the arrows of your gaze, eventhough he is said to be killed effectively (*suhao*) lives as the fortunate one (*suhao*); while he who is not pierced, dies: who taught you this sort of extraordinary archery? (79)

[53] तरुण-जन-नयण-पडिमा-सहस्स-सबलंगि सहसि इंद-महे ।
फंस-सइण्ह-पुरंदर-रहस-कयाणुप्पवेस व्व ॥८०

तरुणजनस्य नयनप्रतिमा नयनप्रतिबिम्बनि तासां सहस्रं तेन शबलं कर्बुरम् अङ्गं वपुः यस्याः सा तथा तस्याः संबोधनं हे तरुणजन-नयनप्रतिमासहस्रशबलाङ्गि । 'सहसि' शोभसे त्वम् । क्व 'इंदमहे' इन्द्रोत्सवे । कीदृशीवेत्याह । 'फंससयण्ह' इत्यादि । स्पर्शसतृष्णः साभिलाषः स चासौ पुरन्दरश्चेन्द्रश्च स्पर्शसतृष्णपुरन्दरस्तेन रमसेनौत्सु-क्येन कृतोऽनुप्रवेशोऽन्तलीनता यस्याः सा स्पर्शसतृष्णपुरन्दररमसकृतानु-प्रवेशेव त्वं शोभसे । एतदुक्तं भवति । व्यक्तवपुषः सुतनोरिन्द्रमहे बहिरिन्द्रोत्सवमवलोकयितुं निर्गतायाः पश्यतां तरुणानां नयन-सहस्रबिम्बैरत्युज्ज्वलतया सकान्तैः शरीरं शबलितमभूदिति शरीरोज्ज्वलत्वं कथितम् । इन्द्रमहे च किलेन्द्रः सन्निहितो भवति । अतस्तन्नयनप्रतिमा-सहस्रशबलाङ्गी । सती सुतनुः पुरन्दरेण सहस्राक्षेण तत्स्पर्शलोलेन सता कृतानुप्रवेशेव शोभत इति । कविना एवमामन्त्र्य सोत्प्रेक्ष्यते ।

O damsel, with your body becoming variegated in Indra's festival due to a thousand reflections therein of the eyes of youths, you appear beautiful as if Indra himself, yearning for a touch, has entered you all of a sudden. (80)

[54] वियसइ तुमं ति मउलेइ न त्ति तुह दंसणूसुया सुयणु ।
इयरंगणायणे असरिसे वि सहस त्ति से दिट्ठी ॥८१

रूपसादृश्यं हि भ्रान्तिकारणम् । तेन हृदयस्थदयिता रूपमसदृश- रूपे स्त्रीजने संक्रामयतः सेयमिति प्रथमं मुदा विकसितनयनस्य तदनु च कृतरूपविवेकस्य नेयमसाविति विषादेन मुकुलितचक्षुषः कान्तस्य कश्चित् सखी दृष्टिविकाससंकोचावस्थां निवेदयति यथा—हे सखि 'से' तस्य तव कान्तस्य दृष्टिस्तव दर्शनोत्सुका सती इतराङ्गनाजनेऽसदृशेऽपि त्वद्रूपसादृश्यरहितेऽपि दृष्टे सति त्वमियमिति विकसति प्रथमम् । 'मउलेइ न त्ति' मुकुलयति नेति । ततः 'सहस त्ति' सहसा त्वमिय नेति तस्य दृष्टिर्मुकुलयति ।

O damsel of tender frame, on sighting some lady, eventhough not resembling you, his eyes expectant to see you, suddenly expand under the impression that it is you, but realizing that it is not you, they suddenly contract. (81)

[55] तुह कर-वंदिय-भायइ-चलण-जुय-प्फंस-मित्त-जीयाण ।
पुप्फवइ इमे जाहिंति वासरा कह जुआणाण ॥८२

'भायइ' भगवती । तस्याश्चरणयुगं तव कराभ्यां हस्ताभ्यां वन्दितं स्तवनेच्छया स्पृष्टम् । त्वत्करवन्दितं तद् भगवतीचरणयुग त्वत्कर- वन्दितभगवतीचरणयुगं च । तस्य स्पर्शः । स एव तन्मात्रं जीवितं येषां यूनां ते तथाविधाः । अतस्तेषां त्वकरवन्दितभगवतीचरणयुगस्प- र्शमात्रजीवानां यूनां हे पुष्पवति वासरा दिवसा इमे त्रयश्चत्वारो वा कथं यास्यन्ति । अयमर्थःद् । पुष्पषितायास्तव स्पर्शमप्राप्नुवतां वन्दना·

प्रसङ्गेन भवदीयकरस्पर्शकृताभिलाषं भनवतीचरणयुगं स्पृशतामेव यूनां भवति जीवितं । जीवानां च दिनत्रयं कथमपि यास्यतीति ।

As you are having menses, how will the youths who are managing somehow to preserve their lives by touching those pair of feet of the goddess that you worship, be able to pull on for these (few) days? (82)

[56] वयणं फुरंत-रयणं रययं जहणं सुवण्णमंगं ते ।
संचारिमा सि सुंदरि वम्महु-भंडार-मंजूसा ॥८३

'वयणं' वदनं 'फुरंत-रयणं' स्फुरन्तो भासुरा रदना दन्ता यस्य वदनस्य तत् स्फुरद्रदनम् । अन्यत्र स्फुरद्रत्नम् । रदन-रत्नयोः प्राकृते 'रयणं' इति भवति । तथा 'रययं जहणं' रतदं जघनम् । रतं सुरतं ददातीति रतदम् । अन्यत्र रजतं रूप्यं तव जघनम् । रतद-रजतयो 'रययं' इति भवति । 'सुवण्णमंग ते' । सुवर्णमङ्गमिति शोभनो वर्णोऽस्येति सुवर्णम् । अन्यत्र सुवर्णं काञ्चनम् । तवाङ्गं बाह्वादि । इत्यनेन प्रकारेण हे सुन्दरि 'संचारिमा' संचारिणी मन्मथस्य भाण्डागारमञ्जूषा त्वमसि । भाण्डागारमञ्जूषा हि रत्नरजतसुवर्णवती भवति । त्वमपि प्राकृतपरिणामापादितरूपसाम्यैः 'फुरंतरयणा'दि-शब्दैस्तथाविधैवेति मन्मथभाण्डागारमञ्जूषा भवसीति ।

Your face has brilliant *rayaṇa* ( 1. 'teeth', 2. 'gems'). Your loins are *rayaya* ( 1. 'source of sexual pleasure', 2. 'silver' ). Your body is *suvaṇṇa* ( 1. 'beautiful', 2. 'gold' ). O beautiful damsel, you are a walking strong-box from the treasury of the Love God. ( 83 )

[57] अच्छीहिं अदीसंतस्स मय-सिलिंबच्छि तुज्झ एएहिं ।
दोसे य च्चिय पडियं अंजण-अच्चंतमलिलयणं ॥८४

हे मृगशिलिम्पाक्षीति विशेषणद्वारेण अक्ष्णोरायतत्वं सुरूपतां दर्शयति । मृगस्य शिलिम्पः शिशुस्तस्येवाक्षिणी यस्याः सा तथा ।

तस्याः सम्बोधनं हे मृगशिशिसपाक्षि । 'अच्छीहिं' अक्षिभ्यां, 'तुज्झ' तव संबन्धिभ्यां अदृश्यमानस्याञ्जनस्य 'अच्चंतमल्लियण' अत्यन्तसामीप्येन लीयमानत्वं दोष एव पतितम् । सर्वोऽपि दर्शनकामो द्रष्टुः समीपमुपसर्पति । अञ्जनस्य तु नयनयोरतिसमीपतयाऽवस्थानं दोषाय जातम् । ताभ्यामदृश्यमानत्वात् ॥

Oh lady with eyes like those of a deer's young one, the very close application of kohl turned out to be a fault, because it could not be detected in your eyes. ( 84 )

[58] रेहइ मियंक-बिंबं सुंदरि तुह गंड-मंडलावडियं ।
मयण-करि-कण्ण-घोलिर-फुरंत-सिय-चारु-चमरं व ॥८५

हे सुंदरि, तव गण्डमण्डलपतितं कपोलं संक्रान्तं सन्मृगाङ्कबिम्बं शशिबिम्बं मदनकरिणः कामहस्तिनः कर्णे 'घोलिरं' घूर्णनशीलं स्फुरद्दीप्तिमत्, सितं धवलं, चारु शोभनं, चमरमिव 'रेहइ' राजते । मदनस्याधिष्ठानं स्त्री तस्य तत्स्थस्य करिणा रूपितस्य तत्कपोलपतितं इन्दुबिम्बं सितचमरमिवेत्युत्प्रेक्ष्यते ॥

O beautiful damsel, the orb of the moon reflected in your round cheeks, looks beautiful as if it were the beautiful, shining, white chowrie on the ears of the elephant in the form of the Love-God. ( 85 )

[59] मयणनिवासो त्ति असोअमच्चसे कीस तं न अप्पाणं ।
सरिसे फलम्मि मुद्धे बाहिं को वच्चइ घराओ ॥८६

हे मुग्धे ऋजुस्वभावे, मदननिवास इति कृत्वा 'कीस' कस्मात् 'अच्चसे' अर्च्चयसि त्वमशोकतरुं न पुनरात्मानमर्चयसि । अशोकवत् तवापि मदननिवासत्वात् एकतनुगतं'(?)। निदर्शनमाह । गृहे बहिश्च यदि सदृशं फलं भवति तदा उभयत्र समे सदृशे (? सदृशे समे) सति फले को 'घराओ' गृहात् 'बाहिं' बहिर्व्रजति । न कश्चिदपीत्यर्थः ॥

You worship the As'oka tree because it is an abode of love. Then why don't you worship your very self ? O naive girl, when the same thing can be gained (inside), who will go outside of the house ? ( 86 )

[60] उण्णय-गरुय-पओहर-नियंब-बिंबंतरालमल्लीणो ।
सुयणु सउण्णो मज्झो एद्दह-मित्तो वि जं धरइ ॥८७

उन्नतयोः पयोधरयोर्गुरुणश्च नितम्बबिम्बस्यान्तरालं 'अल्लीणो' आश्रितो मध्यो मध्यप्रदेशः 'एद्दह-मेत्तो वि' एतावन्मात्रोऽपि तनुरपि 'जं धरइ' यदवस्थितिं करोति तदयं सुतनु सपुण्यः ॥

Your very slender waist is (really) fortunate, oh slender lady, because eventhough it is so slight, and also sandwiched between the high breasts and the heavy, round posteriors, it can still hold itself. ( 87 )

(Index Verse 18)

'छिक्का' 'रक्खा-कंडय'-'सीउण्ह-जरं' ति गयवइ-पयाइं ।
लीलालस-मउयाइं तरंति कह सिक्खिउं कइणो ॥८८

'छिक्कारक्खाकंडका'दीनि गजपतेर्बप्पभट्टेः संबन्धीनि पदानि वर्णसमुदायरूपाणि लीलया लसन्ति शोभन्ते इति लीलालसानि तानि । तानि च मृदूनि च कोमलानि च लीलालसमृदूनि तानि । कइणो कवयः शिक्षितुं रचनया ज्ञातुं कथं 'तरंति' समर्था भवन्ति । अन्यत्र गजपतेः गजेन्द्रस्य पदानि पदन्यासाः । लीलया अलसमृदूनि अलसमन्थराणि । 'कइणो' कपयः वानरा तरलगतयः कथं शिक्षितुं 'तरंति' ।

How can other poets (*kaiṇo*) master the soft and beautiful play (*lilalasa*) of Gajapati's (i e. Bappabhaṭṭi's) (poetic) diction (*gayavai-payāī*) (instanced) in (the Gāthās containing the keywords) *chikkā*, *rakkhā-kaṁḍaya* and *sīuṇha-jara* ? How can the monkeys (*kaiṇo*) learn the gracefully leasurely and soft steps (*līlālasa*) of the lord of elephants (*gayavai-payāī*) ? ( 88 )

[61] जियउ त्ति पय-सणाहं तुह गोत्तं परियणाहि सोउ-मणा ।
छिक्का-कएण बहुसो नासा-विवरे तणं छुहइ ॥८९

जीवतु इत्यमुना पदेन सनाथं तव गोत्रं नाम 'परियणाहि' परिजनात् सकाशात् 'सोउमणा' श्रोतुमिच्छुः सा बाला छिक्कायाः क्षुदितस्य कृते छिक्कानिमित्तं नासाविवरे नासिकान्तरे बहुशो बहुवारान् 'तणं छुहइ' तृणं क्षिपति ॥

Desiring to hear from the attendent your name (uttered) along with the expression 'long live', she repeatedly inserts a blade of grass in her nostrils to induce a sneeze. (89)

[62] तह पूरियमोड्ढणयं तुह दंसण-सउण-गंठि-बंधेहिं ।
भग्ग-मरण-ग्गहं से जह रक्खा-कंडय जायं ॥९०

यदा यदा त्वद्दर्शनाय शकुनो भवति तदा तदोत्तरीये सा शकुन-ग्रन्थिं बध्नाति । तेनैवमुच्यते । तव दर्शनार्थं शकुनग्रन्थिबन्धाः तैः त्वद्दर्शनशकुनग्रन्थिबन्धैः । 'ओड्ढणयं' उत्तरीयं तथा तस्याः पूरितं भृतं यथा रक्षाकण्डकं जातम् । कीदृशम् । 'भग्ग-मरण-ग्गहं' एकत्र मरणग्रहो मरणाभिनिवेशः । अन्यत्र मरणाय ग्रहः [13A]पिशाचः स भग्नो येन तत् तथाविधं रक्षाकण्डकं यथा तस्याः संजातं तथोत्तरीयं तव दर्शनशकुनग्रन्थिबन्धैः पूरितमिति ॥

She so much covered her upper garment with knots tied for preserving the auspiciousness of the omens auguring a meeting with you, that it became a veritable protective amulet driving away the goblin of death (*also* dissolving her resolve to die). (90)

[63] मुक्क-जराए वि तुह गोत्त-कित्तणुक्कंप-सिज्जिरंगीए ।
सीउण्ह-जर-कला-संकिरीए नेच्छिज्जए पच्छं ॥९१

शीतदाघज्वराकुलितस्य हि कम्पस्वेदौ भवतः । कम्पस्वेदाभावे तु ज्वराभावः । ततोऽस्य पथ्ययोग्यता । तया तु बालया मुक्तज्वरयाऽपि पथ्यं नेष्यते । किमित्याह । तव गोत्रस्य नाम्नः कीर्तनादुच्चारणादनुरागादिना उत्कम्पं उद्गतकम्पं 'सिज्जिरं' स्वेदनशीलमङ्गं यस्याः सा तथा । तया त्वद्गोत्रकीर्तनात्कम्पस्वेदनशीलाङ्गया । शीतज्वरेण च स्वेदकम्पौ । तौ च ममाद्यापि विद्येते । त्वद्गोत्रकीर्तनजौ च कम्पस्वेदाविमावित्यलक्षयत्या विमुक्तज्वरयाऽपि सत्या शीतोष्णज्वरस्य कला शेषः तदाशङ्कनशीलया बालया पथ्यं नेष्यते ॥

Eventhough she was cured of the malarial fever, she did not desire to take salutary (food), as she suspected that the fever still slightly persisted, the reason being her experiencing the tremor and perspiration on (hearing) your name utterred. (91)

(Index Verse 19)

'संजीवणि'-'कर-पल्लव'-'कविय' त्ति सरस्सईय गयवइणो ।
पुण्णत्तण-निज्जिय-सेउबंधमुययं पसंसेमो ॥९२

संजीवनीत्यादिरूपायाः सरस्वत्या वाचो गजपतेः संबन्धिन्या उदयमुदीर्णतां समर्थयामः स्थापयामः । कीदृशमित्याह । "पुण्णत्तणेण पूर्णत्वेन काव्यगुणपरिपूर्णतया निर्जितः सेतुबन्धः प्रवरसेनकृतकाव्यं येनोदयेन स तथा । तं तादृशमुदयं समर्थयामः । अन्यत्र सरस्वत्या नद्या उदकं जलं पूर्णतया निर्जितसमुद्रसेतुबन्धं समर्थ्यते ॥

We praise the flourishing *(uyaya)* of the poetic speech *(sarassaī)* of Gajapati (i.e.) Bappabhaṭṭi) in the form of (the *Gāthās* contaning the keywords, *saṁjīvaṇi*, *kara-pallava* and *kaviya* which because of its perfectness has proved superior to the *Setubandha* (*seubaṁdha*), just as we praise the waters *(uyaya)* of the river Sarasvati *(sarassaī)*, which due to their fullness have proved superior to the ocean over which the bridge was built ? (92)

[64] दूसह-विरह-भुयंगम-निद्दय-डक्का वि धरइ सा वरई ।
तुह दंसण-संजीवणि-विणिओय-वसेण सुइणम्मि ॥९३

दुःसह विरहो एव भुजङ्गः सर्पस्तेन निर्दयं दयारहितं यथा भवत्येवं 'डक्का वि' दष्टाऽपि सती । 'सुइणम्मि' स्वप्ने यत्तव दर्शनं तदेव संजीवनी संजीवनी नाम वरौषधिस्तस्या विनियोगो विनियोजनं तस्य वशस्तेन । स्वप्ने तव दर्शनसंजीवनीविनियोगवशेन 'सा वरई' सा वराकी 'जं धरइ' जीवति ॥

Eventhough she is bit pitilessly by the snake in the form of unbearable separation, the poor girl manages to survive through applying the Saṁjīvanī herb in the form of your sight in dreams. (93)

[65] दाविय-कर-पल्लवयं उत्तर-पड(?डिउ)त्तरेहिं जंपंती ।
तइं सह चिंता-दिट्ठेण केण न नडि व्व सा दिट्ठा ॥९४

'दाविय' दर्शितं करपल्लवं यस्मिन् जल्पने तद्दर्शितकरपल्लवकं यथा भवत्येव उत्तरप्रत्युत्तरैः जल्पन्ती वदन्ती 'तइं सह' त्वया सह । 'चिंता-दिट्ठेण' चिंतादृष्टेन, ध्यानप्रत्यक्षीकृतेन त्वया सह दर्शितकरपल्लवं जल्पन्ती नटीव सा बाला केन न दृष्टा । सर्वेणापि दृष्टेत्यर्थः ॥

Who did not see that girl, behaving like a stage actress, when she, making gestures with her hands carried on with you, who were seen by her with her mind's eye, a conversation full of replies and counter-replies ? (94)

[66] सहियाण सयं कवियं तह कहइ कहाणयं पुलइयंगी ।
जह न कलिज्जइ तुह गोत्त-कित्तणेहिं पि पुणरुत्तं ॥९५

'सहियाण' सखीनां । 'सइं कवियं' स्वयं कवितं रचितं । तथा कथानकं कथां कथयति । पुलकिताङ्गी रोमाञ्चिताङ्गी । सा बाला यथा न कल्यते न लक्ष्यते सखीभिः । पुनरुक्तं पुनः पुनस्तव गोत्रकीर्तनैरपि कृतैः सद्भिः । अयमत्रार्थः । दूती स्वनायिकाया भर्तुरभिमुखीकरणायानुरक्तां सूचयति यथैव नाम सा त्वयि रक्ता यदुत भवद्भिरहे विषण्णमनसस्तस्यास्त्वद्गोत्रकीर्तनैरेव रोमाञ्चजननः प्रहर्षो भवति । त्वद्गोत्रकीर्तनानि च सखीनां पुरस्तादेवमेव कुर्वती सा सखीभिस्सरलेति लक्ष्यते । तेन विदग्धतया सा भूयोभूयस्त्वद्गोत्रकीर्तनपरां स्वरचितामेव कथामानन्दहेतुमेतासां कथयति ॥

She narrates before her friends, with her limbs thrilled, stories she concocted about you, in order that she may not be suspected of repeating your name. (95)

(Index Verse 20)

'सइलंभ'-'मोह-भमिरि' त्ति 'मीलियच्छि' त्ति 'वावडच्छि' त्ति ॥
जयइ कइ-कण्ण-सुहया रामस्स व वाइणो वाणी ॥९६

गाथाचतुष्टयरूपा वाणी वाक् कवीनां कर्णसुखदा वादिनो बप्पभट्टेर्जयति । रामस्येव यथा रामस्य वाणी 'कइकन्नसुहया' कपीनां हनुमदादीनां कर्णसुखदा तथा वादिनोऽपि कविकर्णसुखदा वाणी जयति ॥

The poetic words of Vādin (i.e. Bappabhatti) (in the form of the four *Gāthās* containing resepectively the key-words ) *sailambha*, *mohabhamiri*, *miliyacchi* and *vāvaḍacchi*, triumphs—the speech which delights the ears of poets *(kai)* like Rāma's words which delighted the ears of the monkeys *(kai)*. ( 96 )

[67] पडिवत्तिअं करंति मा मा आयार-बाहिरिं भणसु' ।
सद्दहइ न तुह दंसणमेसा सइ-लंभ-वेलविया ॥९७

'पडिवत्ति'मित्यादि । प्रतिपत्तिमासनादिमर्वकुतीमिमां हे सुभग मा मा त्वमाचारबाह्यां भण । यतः श्रद्दधाति न तव दर्शनमेषा बाला 'सइलंभेन' सदाकालं त्वद्दर्शनस्य लम्भेन प्राप्त्या 'वेलविया' प्रतारिता । एतदुक्तं भवति । सततं भवद्भावनाभ्यासात् सर्वमेव रूपं भवानिति पश्यन्ती यावत् पुनः पुनरुपसर्पति न तावद्भवन्तं प्राप्नोतीति । सदा भवद्दर्शन-लाभेन बहुशः प्रतारिता सती सत्यमपि भवद्दर्शनमियं न श्रद्दधाति ॥

Please do not think she is uncultured because she failed to offer you hospitality. She did not trust it were really you, since she had been always cheated of your personal presence. ( 97 )

[68] बाहिं तुह दंसण-लालसाए मुद्धाए मोह-भमिरीए ।
साहेज्ज तुमं को वा न तिए हियए च्चिय वसंतं ॥९८

'बाहिं तुह' इत्यादि । 'बाहिं' बहिर्यत्तव दर्शनं तत्र लालसाया लम्पटाया मुग्धाया ऋजुस्वभावाया 'मोह-भमिरीए' मोघं वृथा मोहेन भ्रमणशीलायाः 'तीए' तस्याः हृदये चेतसि 'वसंत" तिष्ठन्तं 'तुम' त्वां को वा न साधयेत् निश्चिनुयात् । एवदुक्तं भवति । यतः इ[...]*

(Seeing that) yearning to see you outside, that artless girl was wandering fruitlessly ( *or* under delusion ), who would not say you were residing in her heart ? (98)

[69] एत्तो किं दच्छामि त्ति पेच्छणीयं त्ति मीलियच्छि-जुआ ।
हिअए निहिऊण तुमं जोगब्भासं सा कुणइ ॥९९

'(Let me see) what I will see there, what is there worth seeing' —thus closing both of her eyes and fixing you in her mind she is praetising Yoga. (99)

* See the remark at the beginning of p. 50.

* [Folios 14, 15 and 16 are missing. So there is a gap in the text covering the portion of the original from verses 100 to 126 and the commentary portion for the verses 99 to 126.]

× × ×

( Index Verse 21* )

['गुण-तुलिय'-'कोव-तरु'-'दुब्बल' त्ति वाणीए पसरियाए] [17A] तिहा ।
तुह बप्पभट्टि भुयणं भरियं भाईरहीए व्व ॥१२६

'गुणतुलित' इत्यादिकया 'वाणीए' वाण्या प्रसृतया 'तिहा' त्रिधा वक्ष्यमाणैतद्गाथात्रयप्रसृतयेत्यर्थः । हे बप्पभट्टे तया वाण्या भुवनं भृतं व्याप्तम् । 'भाईरहीए व्व' भागीरथ्या गङ्गयेव । यथा त्रिधा स्वर्भुवि पाताले च प्रसृतया भागीरथ्या भुवनं भ्रियते तथा तव वाण्येति ॥

Oh Bappabhatti, your poetic speech spreading in three ways (in the form of the three Gāthās containing respectively the keywords) *gunatuliya*, *kovataru* and *dubbala* has filled whole of the world like the Gaṅgā, which has filled whole of the universe by its three streams. (126)

[70*] गुण-तुलिय-परियणायंत-भुयण-निक्खित्त-सयल-निय-विहवा ।
नालप्पंति[1] सुपुरिसा दायार-दरिद्द-सद्देहिं ॥१२७

गुणैः शौर्यादिभिस्तुलितमाकलितं 'परियणायंत' परिजनायमानं यद् भुवनं जगत् तस्मिन् निक्षिप्तोऽर्पितः सकलनिजविभवो यैस्ते तादृशाः सुपुरुषाः 'दायार-दरिद्द-सद्देहिं' दातृदरिद्रशब्दाभ्यां [1]नालभ्यन्ते न स्पृश्यन्ते, नालप्यन्ते नोच्यन्ते वा[1] । स्वपरिजनः स्वपरिवारोऽयमिति मत्वा स्वविभवेन निखिलमर्पयन्तोऽपि भुवने सुपुरुषा भुवने न दातार उच्यन्ते । स्वपरिजनादन्यत्र ददतो दातार इति प्रसिद्धाः । नापि दात्रा भुवनं मलिनवि-

1. The commentary implies a variant नालब्भंति for नालप्पंति.

भवेन परिवारीकृत्य तर्पयता विभवाभावेऽपि असमदानसामर्थ्येन[2] लक्ष्मणै-श्वर्यसन्निधानात् ॥

Those good men, who have given away all their riches to the (people of the) world who have become just like their kinsmen due to their virtues, cannot be talked about in terms of 'donor' and 'poor' (receiver)'. (127).

[71*] दावंतो च्चिय फुल्लं फलं च गरुयाण होइ कोब-तरू ।
अगिलंतो रविमिंदुं व केण दिट्ठो नहे राहू ॥१२८

'फुल्लं' च पुष्पं रणारम्भादिरूपं तथा रिपुपराभवादिरूपं च । 'दावंतो चिय' दर्शयन्नेव 'गरुयाण' गुरूणां महतां कोपतरुः कोपवृक्षः भवति जायते, नैवमेव पुष्पफलहीनः । दृष्टान्तमाह । 'अगिलंतो' अगिलन् रविमिन्दुं वा केन दृष्टो नभसि राहुः । रविचन्द्रग्रहणकाले एव राहुर्गगने दृश्यते यथा तथा महतां यथोक्तपुष्पफलोपलम्भायैव कोपतरुरुपलभ्यते ॥

The tree of anger of the powerful persons is bound to show (i.e. bear) flowers and fruits. Who has ever seen in the sky Rāhu not swallowing the sun or the moon ? (128)

[72*] जा जिप्पइ सो इर दुब्बलो त्ति परिभाविऊण सप्पुरिसा ।
मण्णंति महाबल-भंजणे [वि] अकयत्थमप्पाणं ॥१२९

'जा जिप्पइ' यो जीयते । 'सो इर' स किल । 'दुब्बलो त्ति' दुर्बल इति । 'परिभाविऊण' परिभाव्याकलय्य । सत्पुरुषा महाबलानां भञ्जनेऽपि कृते सति । 'अकयत्थं' अकृतार्थम् । 'अप्पाणं' आत्मानम् । मन्यन्ते ॥

2. Some words seem to be missing in this portion.

Knowing that he who is conquered is considered by the people to be a weakling, great men do not regard defeating even strong persons as an achievement. (129)

( Index Verse 2?* )

'मज्झा'-'थणवट्ठ'-'सुदंसणेहिं' 'पिय-कंचुइ' त्ति गाहाहिं ।
सहइ त्थण-सालिणीहिं दइयाहिं व सेयभिक्खु त्ति ॥१३०

गाथाभिश्चतसृभिः 'थणसालिणीहिं' स्तनान् शालन्ते प्रशंसन्तीति स्तनशालिन्यस्ताभिः स्तनवर्णिनीभिः अन्यत्र स्तनैः शाल्यन्ते प्रशस्यन्ते इति स्तनशालिन्यस्ताभिरिव प्रियस्त्रीभिरि[17B]व स्तनशालिनीभिः। श्वेतभिक्षुरपि 'सहइ' शोभते । श्वेतभिक्षुरपीति वीतरागतां सूचयति ॥

Eventhough he is Śvetabhikṣu (l. 'a Śvetāmbara monk), he appears glorious with his company of girls of beautiful breasts.

*Alternatively*, Bappabhatti appears glorious because of his Gāthās, which have *majjho*, *thaṇavaṭṭha*, *Sudaṁsaṇehiṁ* and *piya-kaṁcuya* (as their keywords), and which praise the breasts. (130)

[73*] कह मा हि(?झि)जउ मज्झो इमीए कंदोट्ट-दल-सरिच्छेहिं ।
जो नयणेहिं न दीसइ घण-थणहर-रुद्ध-पसरेहिं ॥१३१

'कह मा हिज्जउ मज्झो' कथं मा क्षीयतां कथं क्षयं मा गात् मध्यो मध्यभागोऽसौ, 'इमीए' अस्या बालायाः, 'कंदोट्ट-दल-सरिच्छेहिं' नीलोत्पलदलसदृशाभ्यां जो नयणेहिं' यो नयनाभ्यां, घनस्तनभररुद्धप्रसराभ्यां न दृष्टो नावलोकितः ॥

How can this damsel's waist possibly not get emaciated, deprived as it is of being viewed by her lotus-petal-like eyes, whose view is blocked by the plump breasts ? (*131*)

[74*] थणवट्ट तुह पसाएण फंसिमो तस्स उरयडमसेसं ।
इमिणा उण दहसि न देसि जं म्ह हियएण परिरंभं ॥१३२

'थणवट्ट' हे स्तनपृष्ठ, तव प्रसादेन, 'तस्स उरयडं' तस्य प्रियस्योरस्तटं अशेष 'फंसिमो' स्पृशामो वयं पृथुत्वात्तव, 'इमिणा उण' अनेन पुनर्दहसि तापयसि त्वं, 'न देसि जं म्ह' न ददासि यदस्मभ्यं हृदयेन वक्षसा परिरम्भमालिङ्गनं, त्वया अत्युन्नतेन प्रियस्य हृदयात् दूरोत्सारितत्वात् ॥

Oh Breast Expanse, it is certainly through your favour that I touch the whole of the extensive chest of my beloved; this, however, pains me that you give me no scope to embrace his heart. (132).

[75*] गरुएहिं घणेहिं सुदंसणेहिं पडिवण्ण-मंडलग्गेहिं ।
थण-सुहडेहिं परिरक्खियं पि कह से हडं हिययं ॥१३३

'गरुएहिं' इत्यादिकं स्तनयोः सुभटाभ्यां च रूपितयोर्विशेषणं यथा— 'गरुएहिं' गुरुभ्यां, 'घणेहिं' घनाभ्यां, 'सुंदसणेहिं' सुदर्शनाभ्याम् । अन्यत्र सुदंशनाभ्यां सुसन्नाहाभ्यां, 'पडिवण्ण-मंडलग्गेहिं' प्रतिपन्नमण्डले प्राप्तपृथुत्वे अग्रे ययोस्तौ तथा ताभ्यां प्रतिपन्नमण्डलाग्राभ्याम् । अन्यत्र प्रतिपन्नं मण्डलाग्रमसिर्यकाभ्यां तौ तथा ताभ्यां । स्तनसुघटाभ्यां शोभनस्तनकलशाभ्याम् । अन्यत्र स्तनसुभटाभ्यां स्तनवीराभ्याम् । परिरक्षितमपि 'कह से' कथं तस्याः । 'हडं' हृतं हृदयम् ॥

How was that her heart was stolen eventhrough it was well guarded by the guards in the form of her pitcher-like breasts, which were huge (*or* heavy), thickset (*or* thick), well armoured (*or* shapely) and equipped with sword (*or* with well rounded tits) ? (133)

[76*] तुज्झ पिय-कंचुए पिच्छ घण-थणुच्छंग-फंसण-सइण्हो ।
एण्हिं पडिवण्णो सूइयाण सीसत्तणं गामो ॥१३४

'तुज्झ पिय-कंचुए' तव प्रियकञ्चुके । '[पि]च्छ' पश्य। घनस्तनोत्संगस्पर्शनसतृष्णो । 'गामो' ग्राम्यजनः। 'इण्हि' इदानीम् । सूचिकानां सीवनजीविनाम् । 'सीसत्तणं' शिष्यत्वम् । प्रतिपन्नः प्राप्तः । कञ्चुकं प्रसीव्य तस्याः परिदधद्भिः (?) घनस्तनस्पर्शः प्राप्यते इति । सूचिकानां कञ्चुकसीवनविज्ञानशिक्षणाय शिष्यत्वं ग्राम्यः प्रतिपन्नः ॥

Longing to touch the roominess within your favoured blouse that covers your plump breasts, that boor has now accepted apprenticeship of tailors. (134)

( Index Verse 23 * )

'गब्भो'-'निय-पडिबिंबं' ति 'इंदुणो मंडलं' 'सरेहि'' ति ।
वायाए वि सुपसायाइ वाइ[1] गुणिणो तुह नमंति ॥१३५

"गब्भो'इत्यादि-गाथाचतुष्टया[18A]त्मिकया इति वाचाऽपि 'सुपसायाए' सुप्रसादयाऽपि सुष्ठु प्रसन्नया । 'वाइ' हे वादिन् श्रीबप्पभट्ट । गुणिनस्तव नमन्ति ॥

Oh Vādin (i.e. Bappabhatti), lovers of poetry bow down to your limpid poetic speech in the form of the Gāthās which have *gabbho, niyapaḍibiṁbaṁ, iṁduṇo maṁḍalaṁ* and *sarehiṁ* (as their keywords). (135)

[77*] पिय-परिरंभं मज्झस्स कढिण-थण-जहण-तुंगिमक्खित्तं ।
जं देइ तेण महिलाण नूणमइवल्लहो गब्भो ॥१३६

कठिनस्तनजघनानां तुङ्गिमा तुङ्गत्वं तेनाक्षिप्तमपहृतं प्रियपरिरम्भं प्रियालिङ्गनम् । 'ज देइ' यद् यस्मादुच्छ्वसतो मध्यस्य ददाति तेन कारणेन महिलानां स्त्रीणां अतिवल्लभो गर्भो नूनमिति मन्ये ॥

1. वाहेइ.

Pregnancy is very dear to women because I think it now allows their middle the lover's embrace which it was deprived of due to the loftiness of hard breasts and the back-parts (136)

[78*] निय-पडिबिंबं दट्ठूण पियइ अण्णो चि संकिरो डिंभो ।
ओसरइ रुयइ पहणइ करेण जणणीए थणविट्ठं ॥१३७

उज्ज्वले स्तनपृष्ठे निजप्रतिबिम्बं 'दट्ठूण' दृष्ट्वा । 'पियइ अण्णो चि' अन्यः कोऽपि अयं स्तनो पिबतीति । 'संकिरो' मुग्धत्वादेव शङ्कमानो डिम्भः शिशुः । 'ओसरइ' स्तनपृष्ठादपसरति । 'रुयइ' रोदिति । 'पहणइ' प्रहन्ति ताडयति । 'करेण' हस्तेन । 'जणणीए' जनन्याः स्तनपृष्ठम् ॥

Seeing its own reflection in the breast, and so suspecting that some one else is sucking there, the baby moves away from its mother's breast, weeps and strikes it with its hand. (137)

[79*] मह दइया-सम-नयणाए एस बालाए वयण-पडिवक्खो ।
इय गणिऊण कुरंगेण इंदुणो मंडलं गहियं ॥१३८

'मह दइया-सम-नयणाए' मम दयितासमनयनाया बालाया यद्वदनं तस्यैष इन्दुः प्रतिपक्षः प्रतिकूल इति गणयित्वा यादृशी मदीयदयितायाः कुरङ्ग्या नयने तादृशी बालाया अपीति तन्नयसादृश्यकृतस्नेहाच्चन्द्रमसे कुपितेन कुरङ्गेण हरिणेन 'इंदुणो' चन्द्रस्य मण्डलं गृहीतम् ॥

'This moon is a hostile rival of the face of the girl which has eyes resembling my beloved's'—thinking thus the dear has caught hold of the moon's orb. (138)

[80*] विसमेहिं सरेहिं जणं जिणंत कंदप्प दप्पिओ कीस ।
न नियसि दिट्ठीए च्चिय विणिज्जियं कुवलयमिमीए ॥१३९

'विसमेहिं सरेहिं' विषमैः पञ्चभिः शरैः 'जणं जिणंत' जनं लोकं अयन् विजयमानः हे कन्दर्प काम दर्पितो गर्वितो 'कीस' कस्मात् । 'ण णियसि' न निरीक्षसे । 'दिट्ठीए च्चिय' दृष्टयैव । 'इमीए' अनया बालया विनिर्जितं 'कुवलयं' कोः पृथिव्या वलयं मण्डलम् । अन्यत्र कुवलयं नीलोत्पलं दृष्टयैवानया विनिर्जितम् । त्वया तु विषमैरुग्रैर्वा कियानपि जनो जित इति कन्दर्प कस्ते दर्पः ॥

O Love-god, why do you take pride in conquering (only some) people by means of *viśama* (1. 'odd in number,' 2. 'powerful') arrows ? Don't you see this girl has conquered *kuvalaya* (1. the blue lotus', 2. 'the whole of the circular earth') by means of just her glance ? (139)

( Index Verse 24 * )

'सकयग्गह'-'सच्छप्पय'-'को उण उत्तरो' त्ति वाणीए ।
गयवइ पेच्छ वसाए दिसागओ ते जसो जाओ ॥१४०

'सकयग्गह' इत्यादिकया । 'वाणीए' वाचा । हे 'गयवइ' गजपते । 'पेच्छ' पश्य । 'वसाए' वशया यथेष्टप्रवर्तनेन वशवर्तिन्या 'दिसागओ पसो(?जाओ)', 'दिसागओ' दिग्गतं । 'ते' तव यशो जातम् । अन्यत्र, हे गजपते, 'वसाए' वशा हस्तिनी तस्यास्तद्वाणीतो वशायाः[18B]हस्तिन्याः सकाशात् । 'दिसागओ' दिग्गजः । 'पेच्छ' पश्य । तव यशो जातमिति ॥

Through your obedient (*vasā*) poetic speech (in the form of the *Gāthās* having the key words) *sakayaggahu, sacchappaya* and *ko uṇa uttro*, look, Oh Gajapati (i.e. Bappabhaṭṭi), your fame has spread in all quarters.

*(Alternatively,)* Oh lord of elephants, your fame has become a quarter-guarding elephant towards the cow-elephant in the form of your poetic speech. (140)

[81*] स-कय-ग्गह-रहसुत्ताणियं पि न पिओ पियामुहं पियइ ।
अप्पुव्व[1]-तक्खणुम्मिल्ल-विब्भमुल्लोल-लोलच्छो ॥१४१

'सकय-ग्गह-रहसुत्ताणियं पि' सकचग्रहं सकेशग्रहं रभसोत्तानित-मप्युत्तानीकृतमपि । 'न पिओ' न प्रियो वल्लभः । प्रियामुखं पिबति । कीदृशः सन्नित्याह । 'अप्पुव्व' अपूर्वा तत्क्षणं 'उम्मिल्ला' उन्मीलिता विभ्रमा विलासा भ्रूभङ्गस्मितहसिततरलविलोकनादयस्तेषामुल्लोलः प्राचुर्यं तत्र 'लोलच्छो' लोलाक्षः सन् न प्रियामुखं पिबतीति प्रियः ॥

Eventhough seizing her hair, the lover has with sudden force raised up the face of his beloved, he does not kiss it, because his eyes are feasting on the extraordinarily charming outburst of a lot of sportive gestures on her part. (141)

[82*] स-च्छप्पय-कमल-दलद्ध-विब्भमद्धच्छि-पिच्छियं तिस्सा ।
कुप्पासमिसीसि-वलंत-कंधरं कं ण मोहेइ ॥१४२

सषट्पदं सभ्रमरं यत् कमलार्धं तस्येव विभ्रमो लीला शोभा यस्य तथा तच्च, तत् अर्धाक्षि तच्च सषट्पदकमलदलार्धविभ्रमार्धाक्षि प्रेक्षितम् । कीदृशम् । 'कुप्पासमिसीसिवलंतकंधरं' कूर्पासः कञ्चुकं तस्य मिषं व्याजः किलाहं पृष्ठतः कूर्पासमवलोकयामीति तेन कूर्पासमिषेण । 'ईसिवलंतकंधरं' ईषन्मनाग्वलमाना कन्धरा ग्रीवा यस्मिन् तत् कूर्पासमिषेषद्वलमानकन्धरम् । तथाविधमर्धाक्षिप्रेक्षितं तस्मात् तस्या बालायाः । 'कं न मोहेइ' कं पुरुषं न मोहयति न व्याकुलीकरोति ॥

Who is not fascinated by her glancing with half-closed eyes, that have the sportive beauty of a halved lotus-petal with a black bee therein, when she slightly turned her neck under the guise of (having a casual look at her) blouse ? (142)

1. अउराव्व.

[83*] तह पाविय-खंडण-पीलणो वि जो वहइ निब्भरं रायं ।
जइ सो वि होइ अहरो को उण तुह उत्तरो सुयणु ॥१४३

'तह पाविय खंडण-पीलणो वि' तथा तेन प्रकारेण प्रियकृतेन प्राप्तं खण्डनं पीलनं च येन स तथा प्राप्तखण्डनपीलनोऽपि यो वहति धारयति प्रचुरं रागमरुणत्वं, अन्यत्रानुरागं 'जइ सो वि होइ' यदि सोऽपि भवत्यधरः कः पुनरुत्तरस्तव सुतनो भविष्यति । अधरशब्देन न्यग्भूत ओष्ठश्चोच्यते । उत्तरस्तूच्चैः स्थितः ।

Oh lovely damsel, that which in spite of being wounded and pressed, shows abundant *rāa* ('love', *alternatively*, 'redness'), and even then if it is (called) *ahara* ('lower lip', *alternatively*, 'inferior'), then who possibly can be your superior ? (143)

**( Index Verse 25 * )**

'झीणा' 'सिसिरो वि' 'विसालयाइं' 'सइ-पंथिय' त्ति वाइ[1] तुमं ।
आसाइयाए मइओ कह न पसण्णाए[2] वाणीए ॥१४४

'झीणा' इत्यादि-गाथात्मिकया वाण्या । 'पसण्णाए' प्रसन्नया प्रसादगुणयोगात् प्रकटार्थया, अन्यत्र प्रसन्नया अच्छसुरया । वाण्या । 'आसाइयाए' आसादितया ज्ञानगोचरं प्रापितया, अन्यत्र आस्वादितया पीतया । 'वाइ तुमं' हे वादिंस्त्वम् । 'मइओ कह न' म[19A]दितो मदं ग्राहितः कथं न । एवंविधां वाणीं रचयन्नपि कवित्वमदरहित इत्यर्थः ॥

Oh Vādin, how is it that you were not puffed up by your composition of the lucid verses with *jhīṇā, sisiro vi, visālayāi* and *sai-paṁthiya* (as their respective key-words) ?

(*Alternatively*, how is it that you were not intoxicated by drinking the clear wine ?) (144)

1. वाएम.  2. यसण्णाए.

[84*] तह झीणा जह मउलिय-लोयण-पुड-विहडणे वि असमत्था ।
सक्किहइ दुकरं घर-गयं पि दट्ठुं तुमं वरई ॥१४५

'तह झीणा' तथा क्षीणा त्वद्विरहे कृशाङ्गी जाता सा । 'जह मउलिय-लोयण-पुड-विहडणे वि' मुकुलिते संकोचिते ते च ते लोचनपुटे च तयोः 'विहडणं' विघटनं उन्मीलनेन पृथक्करणं तत्राप्यसमर्था सती । 'घर-गयं पि' आस्तां दूरगतं, गृहगतमपि । 'तुमं' त्वां हे सुभग । 'वरई' वराकी । 'दट्ठुं' द्रष्टुम् । 'सक्किहही(? हइ) दुक्कर" शक्ष्यति दुष्करम् । न शक्ष्यति द्रष्टुं दुःखेन वा शक्ष्यतीत्यर्थः ॥

She has become so emaciated and weak that she is unable to open her closed eye-lids. The poor girl would be hardly able to see you if you were there before her in her residence. (145)

[85*] सिसिरो वि तुह विओए दहइ ससी मुह-विणिज्जिओ वरइं ।
कय-परिभवो वियारं न वच्चए को व[1] विहुरम्मि ॥१४६

'मुह-विणिज्जिओ' मुखेन विनिर्जित इति कृत्वा । तव वियोगे शिशिरोऽपि शीतलोऽपि शशी चन्द्र वरइं वराकीं दहति तापयति । अथवा 'विहुरम्मि' पराभवकारिणो विधुरे व्यसने सति । 'कय-परिभवो' कृतः परिभवो यस्यासौ कृतपरिभवः । 'वियारं न वच्चए को व' [विकारं] न व्रजति को वा । अपितु सर्व एव परिभवं प्राप्य परिभवितु-रापदि सत्यां विकारं व्रजत्येव ॥

Eventhough the moon is cool, it scorches that poor girl (presently suffering) separation from you, because her face triumphed over it. Being humilated, who would not react (i e retaliate) when (the humiliator) is in trouble ? (146)

[86*] अमयमइया वि बाला करेइ कलमलय-दाह-मुच्छाओ ।
पेच्छंती किं कीरउ नयणाइं विसालयाइं से ॥१४७

---

1. व्व.

'अमयमइया वि' इत्यादि। अमृतमय्यपि अमृतात्मिकाऽपि बाला प्रेक्षमाणा[1] सती कलमलकदाहमूर्छाः करोति यूनाम्। तदत्र 'किं कीरउ' किं क्रियताम्। यतो 'नयणाइं विसालयाइं से' विषालये विषस्यालये स्थाने 'से' तस्या नयने नेत्रे। सर्वशरीरममृतमयं, नयने केवलं विषालये, नयनाभ्यां च प्रेक्षते। ततः प्रेक्षमाणा कलमलकादीन् करोति। अन्यत्र, 'विसालयाइं' विशाले एव विशालके दीर्घे नयने यस्मात्। अतो दीर्घ-नयनाभ्यां पश्यन्ती विरहिणां दाहादीन् कुरुते इति॥

Eventhough the girl is all nectar, when she glances (at the boys), she causes them painful yearning, burning and swooning. But what can be done in this matter ? (The fact is) her eyes are *visālaya* (1. 'seats of poison'. 2. 'long'.) (147)

[87*] भुवणब्भंतर-सइ-पंथियस्स हिययस्स पिययमो मामि।
कुणइ पयाणय-भंगं कहा-पसंगेण वि पलत्तो॥१४८

भुवनाभ्यन्तरे 'सइ-पंथियस्स' सदापथिकस्य हृदयस्य मनसः कथा-प्रसंगेनापि 'पलत्तो' प्रलप्तः संभाषितः 'प्रियममो' प्रियतमः प्रयाणक-भङ्गं करोति। 'मामि' इति संगतजनामन्त्रणम्। कथाप्रसङ्गेनापि श्रुते प्रिये तरलं मनो निश्चलीभवतीत्यर्थः॥

O friend, my mind, always a wanderer through the world, is stopped in its wanderings even when there is a casual conversation with my loved one. (148)

( **Index Verse 26 *** )

कइ-बप्पहट्टिणो 'दर-दलंत-सयवत्त'-'णलिणि'-'कु[19B]मुएहिं'।
रेहइ घण-पायड-महुरसद्द-सुहयं सरं व मुहं॥१४९

1. प्रेक्ष्यमाणा.

'कइ-बप्पहट्टिणो' कविबप्पभट्टेः 'दर[1]-दलंत-सयवत्त-णलिणि-कुमुएहिं' दरदलच्छतपत्रनलिनीकुमुदैर्गाथानिबद्धैर्घनप्रकटमधुरशब्दैः सुभगं जनप्रियं मुखं । 'रेहइ' राजते । किमिव । 'सरं व' सर इव । यथाऽर्धदलच्छतपत्रया नलिन्या कुमुदैश्च 'घण पायडो' घनप्रकटो यो 'महुरसो' मधुरसो मकरन्दस्तेन आर्द्रं सुभगं सरो राजते तथाऽस्य मुखमिति ॥

The poet Bappabhatti's countenance shines with (his Gāthās which have) *dara-dalaṁta sayavatta, naliṇi* and *kumuya* (as their respective keywords), it being consequently attractive because of their compact, lucid and sweet wording, just as a lake appears beautiful due to its night-lotuses and its lotus-plants having half-blown lotuses, it being consequently attractive because of the spilling of abundant sap. (149)

[88*] रय-मुम्मुर-निब्भर-दर-दलंत-सयवत्त-णिंत-भमरोली ।
उग्गाहियग्घ-धूय व्व दीसए कमलिणी रविणो ॥१५०

रजः परागः स एव मुर्मुरोऽग्निविशेषस्तेन निर्भरं पूरितं, तच्च तत् 'दर-दलंत-सयवत्तं' चार्धविकसच्छतपत्रं च रजोमुर्मुरनिर्भरार्धदलच्छतपत्रं, तस्मात् 'निंती' निर्यन्ती 'भमरोली' भ्रमरावलिर्यस्याः सा रजोमुर्मुरनिर्भरार्धदलच्छतपत्रनिर्यद्भ्रमरावलिः । कमलिनी 'रविणो' रवेः । 'उग्गाहियग्घधूय व्व' दह्यमानागुरुचन्दनादिधूपधूमलेखाया भ्रमरावलिसन्निभायाः उद्गमनेन उद्ग्राहितः सज्जितोऽर्घधूपो यया सा तथाविधेव 'दीसए' दृश्यते । शतपत्रं कमलम् ॥

On account of the line of (black) bees issuing from its lotuses, half-blown and full of ember-like pollen, the lotus-plant appears as if it is holding up incense worshipfully towards the sun. (150)

[89*] आलोय-मित्त-वियसंत-कुमुइणी-पीयमाण-घण-जोण्हं ।
ओ नलिणि मियंकं परिहरंति तइ वंचिओ अप्पा ॥१५१

1. दल॰.

आलोकमात्रेण दर्शनमात्रेण विकसन्त्या कुमुदिन्या पीयमाना घना ज्योत्स्ना यस्य स तथा । तं तादृशं 'मियंकं' मृगाङ्कं चन्द्रमसं 'परिहरंति' परिहरमाणे 'ओ णलिणि' हे नलिनि 'तइ' त्वया वञ्चित आत्मा ॥

Because the Night-lotus-plant had its lotuses blown the moment it saw the moon and it drank deeply the moon-light, you, oh Day-lotus-plant, are shunning the moon, but thereby you have defrauded yourself. (151)

[90*] जइ होज्ज निसा तीए वि सो खणो जइ तहिं पि न हु मिहिया।
ता दच्छसि ससिलेहं हा कुमुय कहिं तुह वियासो ॥१५२

यदि भवेन्निशा रात्रिः। 'तए वि' तस्यामपि निशायां 'सो खणो' स क्षणः चन्द्रोदयलक्षणः । 'जइ तहिं पि' यदि तस्मिन्नप्युदयलक्षणे क्षणे 'न हु मिहिया' रजोनीहाराद्यावरणरूपा नहि भवेत् । 'ता दच्छसि' तद् द्रक्ष्यसि कुमुद त्वं 'ससिलेहं' शशिरेखां नान्यथेत्येवं शशिरेखादर्शनविघ्नहेतुषु सत्सु 'हा' कष्टं 'कुमुय' हे कुमुद । अन्यत्र, हे कुत्सितमृत, हे कुमृत, 'कहिं' क्व 'तुह वियासो' तव विकासः तव प्रमोदः ॥

If there is night and there also that chance (of moon-rise), and then too if there is no fog, then only you may see the crescent moon : Oh night-lotus (*Alternatively*, Oh you who face ignominious death), where is the hope for your blowing (*alternatively*, for joy) ? (152)

( **Index Verse 27*** )

'रेवा' 'पव्वायंगी' 'साहीणे' 'किं फलं' ति गाहाओ ।
विरएउं गयवइणो वि बिम्हओ नूण संजाओ ॥१५३

[20A] 'रेवा' 'पव्वायंगी' इत्यादि-गाथा 'विरएउ'' विरचय्य । 'गयवइणो वि' गजपतेरपि बप्पभट्टिकवेरप्यतिसुन्दरार्थतया विस्मयः सञ्जातो 'णूणं' इति मन्यते ।

On composing the Gāthās (contaning the key-words) *revā*, *pavvāyaṅgī*, *sāhiṇe* and *kiṁ phalaṁ* (respectively), it seems Gajapati (i.e. Bappabhaṭṭi) himself became wonderstruck (by their beauty). (153)

[91*] ठाणे ठाणे णमिऊण धारिया निय-पयं पि से दिण्णं ।
विंझस्स तह वि रेवा मणयं पि न सम्मुही जाया ॥१५४

'ठाणे ठाणे नमिऊण' इत्यादि । स्थाने स्थाने 'नमिऊण' नत्वा । 'धारिया' धृता । 'निय-पयं पि' निजपदमपि । अन्यत्र, निजपयोऽपि । 'से' तस्या रेवाया 'दिण्णं' दत्तं विन्ध्येन । 'विंझस्स तह वि' विन्ध्यस्य तथाऽपि । 'रेवा' नर्मदा । 'मणयं पि' मनागपि । न सम्मुखी अभिमुखी जाता ॥

She has been borne by him at a number of places by bending low, she has been given by him even his *paya* (1. 'water' 2. 'position'). Even then Revā did not turn towards (*alternatively*, 'become affectionate towards') Vindhya even a wee bit. (154)

[92*] जोण्हा-पव्वायंगी न विमद्द-सहा इम त्ति मा संक ।
ससियर-मउलिज्जंतं पि कमलमलि-चड्डणं सहइ ॥१५५

ज्योत्स्नया चन्द्रिकया 'पव्वायं' प्रवाणं शुष्कमङ्गं यस्याः सा ज्योत्स्नाप्रवाणांगी सती न विमर्दसहा । 'इम त्ति' एषेति । 'मा संक' मा शङ्कस्व । अयमत्रार्थः । आस्तां दिनकरातपो, ज्योत्स्नयाऽपि यस्याः शुष्यत्यङ्गं सा सुकुमाराङ्गी कथं विमर्दं सहते इति शङ्कमानः कश्चिदेवं वार्यते । यतः 'ससियर-मउलिज्जंतं पि' शिशिरकरैर्मुकुलीक्रियमाणमपि कमलं पद्मम् । 'अलि-चड्डणं' भ्रमरविमर्दं सहत इति ॥

Do not be apprehensive that because her body withers even under moonlight this girl cannot bear rubbing and squeezing : A day-lotus, eventhough it closes at the touch of the moon's rays is able to bear the rubbing and squeezing from the bee. (155)

[93*] रोवंतु नाम तं जणमपिच्छमाणाइं दड्ढ-नयणाइं ।
तं हियय किं विसूरसि साहीणे चिन्तियव्वम्मि ॥१५६

तं जनमभीष्टं जनम् । 'अपेच्छमाणाइं' अप्रेक्षमाणे अपश्यन्ती । 'दड्ढ-णयणाइं' दग्धनयने । 'रोवंतु नाम' रुदतां नामेति । युक्तं तावत् । 'तं हियय' त्वं हृदय । 'साहीणे' स्वाधीने स्वायत्ते चिन्ततव्ये सति । 'किं विसूरसि' किमलाभेन तप्यसे ॥

Let the wretched eyes weep indeed, as they do not see that person. But Oh heart, why do *you* feel afflication, when whatever is thought of is quite within your reach? (156)

[94*] ण भणह किमुज्जुयं चिय सहिओ अम्हेहिं सो तुह हिओ त्ति।
किं फलमिमिणा माणोवएस-माया-पवंचेण ॥१५७

'सहिओ' हे सख्यः । 'अम्हेहिं' अस्माभिः स प्रियः । 'तुह' तव । 'हिओ त्ति' हृत इति । 'उज्जुयं चिय' ऋज्वेव । किं न भणत यूयम् । 'किं फलं' किं पुनः फलम् । 'इमिणा' अनेन, त्वया भर्तरि मानः कर्तव्य इत्यनेन प्रियपराङ्मुखकारिणा मानोपदेशमायाप्रपञ्चेन ॥

Oh friends, why do you not admit straight way, 'we have kidnapped that (beloved of) yours ? What is the use of this deceitful advice (of yours) to me to affect injured pride?' (157)

( Index Verse 28* )

'एकावत्थं' 'महणे' 'पवसण-मण' 'सप्पणामियं' 'कुमरी' ।
इय विरएउं तुमए गयवइ मूईकया कइणो ॥१५८

'एक्कावत्थं' 'महणे' इत्यादिगाथा विरचय्य हे गजपते 'तुमए' त्वया मूकीकृताः कवय इति सुगमम् ॥

Oh Gajapati (i.e. Bappabhaṭṭi) by composing (the Gāthās having as their respective keywords) *ekkāvatthaṁ, mahaṇe, pavasaṇa-maṇa, sappaṇāmiyaṁ* and *kumārī* you have made (all other) poets dumb. (158)

[95*] अमुणिय-विसेस-पसरंत-तोस-रोसंसु-भूसियं तिस्सा ।
चाडुम्मि विप्पिय[20B]म्मि वि एक्कावत्थं मुहं सरिमो ॥१५९

तोषश्च रोषश्च तोषरोषौ ताभ्यां अश्रूणि, प्रसरन्ति च तानि तोषरोषाश्रूणि च प्रसरत्तोषरोषाश्रूणि । 'अमुणिय-विसेसाणि' च अज्ञातविशेषाणि च तानि प्रसरत्तोषरोषाश्रूणि च अज्ञातविशेषप्रसरत्तोषरोषाश्रूणि । तैर्भूषितमलंकृतं 'तिस्सा' तस्याः । चाटुनि स्वादौ कृते, 'विप्पियम्मि' इति विप्रियेऽपि अपराधे कृते । 'एक्कावत्थं' एकावस्थमभिन्नावस्थम् । मुखं 'सरिमो' स्मरामः । चाटुक्रियया तोषाश्रूणि, विप्रियजनने च रोषाश्रूणि इत्युभयथाऽश्रुसंभवादेकावस्थं मुखमित्यर्थः ॥

We recall her face presenting the same mien to flattering praise or offense, and adorned accordingly with the flow of tears, which it cannot be guessed whether they were due to pleasure or anger. (159)

[96*] महणे तिहुयण-साहारणे वि हरिणा सिरी सयं गहिया ।
किं बहुणा देवा वि हु सयत्थ-करणुज्जुया सव्वे ॥१६०

मथने 'तिहुयण-साहारणे वि' त्रिभुवनस्यापि साधारणे समानेऽपि । 'हरिणा' विष्णुना । 'सयं' स्वयं आत्मना । श्रीः लक्ष्मीर्गृहीता मथकानामन्येषां तु न दत्ता । अथवा किं बहुना । 'देवा वि हु[1]' देवा अपि

1. खु.

खलु स्फुटम् । 'सयत्थ-करणुज्जुया' स्वार्थकरणोद्यताः सर्वे इति सुगमम् ॥

Eventhough the churning was commonly done by the three worlds (i.e. all), Viṣṇu solely took possession of Lakṣmī. (But) what is the point of saying more ? The gods too, one and all, are doubtlessy keen to cater to their own interest. (160)

[97*] पवसण-मण-दइय-कया[1] निउणाहिँ सहीहिँ विरह-सहणत्थं।
अलिया वि हु अवराहा वहूए दो-तिण्णि कहियंति ॥१६१

प्रवसनमनसा प्रवासकामेन दयितेन । 'कया' कृताः । प्रवसनमनोदयितकृताः । 'अलिय च्चिय' अलीका एव अपराधा विरहसहनार्थं निपुणाभिः सखीभिः[2] । 'वहूए' वध्वाः । क्रमशः 'कहिज्जति' कथ्यन्ते । येनेयं तदपराधश्रवणाद् भर्तरि किञ्चित्सरोषविरागात् तद्विरहमपि सहेतेत्यनेन भवत्या युवत्यन्तरसन्मानादिरूपास्ते तवापराधाः कृता इत्यलीकमेव यस्याः सखीभिः कथ्यते ॥

When the husband was about to go abroad, the wife's resourceful friends told her about his two or three concocted offenses, so that she may be able to bear (the impending) separation. (161)

[98*] जइ महसि[3] गारवं पिय-जणम्मि मा कुणसु ता इमं माणं।
सहि सप्पणामिया मूलिया वि लोयम्मि सु-महग्घा ॥१६२

[यदि] 'महसि' वाञ्छसि । 'गारवं' गौरवम् । 'पिय-जणम्मि' प्रियजने । 'मा कुणसु' मा कार्षीः । 'ता इमं' तदिमं स्तब्धतादिलक्षणं मानम् । तेन सप्रणामिकया त्वया भर्तरि भाव्यम् । यतः हे सखि 'सप्पणामिया' सह प्रणामेन वर्तत इति सप्रणामिका, अन्यत्र सर्पनामिका सर्पाक्षी मूलिका ओषधिरपि लोके सुमहार्घा भवति । सुग[21A]मम् ॥

If you desire regard from your loved one do not entertain such (an attitude of) injured pride towards him. Oh friend, the

1. कयं. 2. सुखीभिः. 3. जइ व महसि.

*sappaṇāmiyā* (1. 'One who bows down in humility', 2. 'the Sarpākṣī'), even if it be a herb, is highly prized among the people. (162)

[99*] पढम-सुरयम्मि कुमरी खलीकया तह दढं अणारेण ।
अह झिंडुलि-वेणी वि हु न सहइ नामं पि पुरिसाणं ॥१६३

प्रथमसुरते 'कुमरी' कुमारी खलीकृता कदर्थिता । 'तह दढं' तथा दृढं । 'अनाढेण' ह्रस्वेन, अन्यत्र अनःसदृशसाधनेन । 'जह झिंडुलि-वेणी वि हु'—'झिंडुली' पुंश्चली, तस्याः सम्बन्धिनी वेणिः सन्ततिर्यस्याः सा झिंडुलिवेणिरपि, असतीसन्तानोत्पन्नाऽपि । 'खु' स्फुटम् । सा कुमारी न सहते नामापि पुरुषाणाम् ॥

In her first sexual intercourse, the girl was so outraged by her paramour (*alternatively*, 'by the outsize prick') that, eventhough she is a descendant of an unchaste woman, she cannot now even tolerate the name of males. (163)

( **Index Verse 29 *** )

'कइअव-रुण्णं' 'आसंकिऊण' इय बप्पहट्टिणा भुवणं ।
बाहाहि व फुरियत्थाहिं निज्जियं असइ-गाहाहि ॥१६४

'कइयव-रुण्णं' 'आसंकिऊण' इति 'फुरियत्थाहिं' स्फुरित उज्ज्वलोऽर्थो ययोर्गाथयोः, अन्यत्र स्फुरितमुज्ज्वलं अस्त्रं आयुधं ययोर्बाह्वोः ते स्फुरितार्थगाथे स्फुरितास्त्रौ च बाहू । ताभ्यां स्फुरितार्थाभ्यां 'असती(?इ)-गाहाहिं' असतीगाथाभ्याम्, बाहुभ्यामिव स्फुरितास्त्राभ्यां बप्पभट्टिना भुवनं निर्जितम् । 'बाहु' शब्दः प्राकृते स्त्रीलिङ्गः ॥

By means of his two brilliant (*phuriyattha*) Gāthās about unchaste women (which contain respectively the keywords) *kaiava-ruṇṇaṁ* and *āsaṁkiūṇa*, Bappabhaṭṭi has conquered the three worlds as if by his arms that wielded shining missiles (*phuriyattha*). (164)

[100*] कंप-निवडंत-कुडयाण सलिल-हारीण हरिस-बाहड्ढं ।
तुह दीह-दंसण-कए कइअव-रुण्णं न निट्ठाइ ॥ १६५

कम्पेन निपतन् कुटो घटो यकाभ्यस्ताः, तथा तासां कम्प-निपतत्कुटकानाम् । 'सलिल-हारीणं' पानीयहारीणाम् । 'हरिस-बाहड्ढं' हर्षेण बाष्पोऽश्रु तेनाढ्यं परिपूर्णं हर्षबाष्पाढ्यम् । तथा भवत्येव तव दर्शनस्य कृते दीर्घकालं दर्शनार्थम् । 'कइअव-रुण्णं' कैतवेन शाठ्येन रुदितम् । 'न निट्ठाइ' न निष्ठां परिसमाप्तिं याति ॥

As the water-pots of the water-fetching girls fell down due to (passionate) trembling, their pretended weeping in which (in fact) tears of joy were being shed, does not stop because they want to see you for long. (165)

[101*] आसंकिऊण गब्भं पवास-विणियत्त-भत्तुणो पुरओ ।
पुप्फवई[1]-नेवत्थेण छिछई पुणइ सुद्धाइं ॥१६६

'आसंकिऊण गब्भं' गर्भाशङ्कां कृत्वा । 'पवास-विणियत्त-भत्तुणो' प्रवासाद्विनिवृत्तभर्तुः । पुरतोऽग्रतः । 'छिछई' असती । 'पुप्फवई-णेवत्थेण' पुष्पवत्या नेपथ्येन वेषेण रुधिरारक्तपरिधानादिनोपलक्षिता । 'पुणइ सुद्धाइं' शुद्धान्यपि मया स्पृष्टानीति वस्तूनि स्नानाभ्युक्षणादिना पुनाति पवित्रीकरोति ॥

Suspecting pregnancy, the unchaste woman wearing the clothes fit for a woman in menstruation, is purifying even pure things (i.e. things undefiled by her contact) in the presence of her hus band, just returned from abroad. (166)

( **Index Verse 30*** )

'सहि-कज्ज[1] 'खित्त-मुह' 'धेणुयाउ' 'दियरु' त्ति वाइणो वाणी ।
एक्क च्चिय निज्जिय-पवरसेण-अक्खोहिणी जयइ ॥१६७

1. पुप्पवई.

'सहि-कज्ज' इत्यादि-गाथालिका वादिनः कवेर्वाणी। 'एक्क च्चिय' एकैव। 'निज्जिय-पवरसेण-अक्खोहिणी' निर्जितः प्रवरसेनकविर्यया सा तथा। क्षोभो विद्यते यस्याः सा क्षोभिणी। न क्षोभिण्यक्षोभिणी अविघटमानार्थेत्यर्थः। [21B] निर्जितप्रवरसेना चासौ अक्षोभिणी च निर्जितप्रवरसेनाक्षोभिणी। अन्यत्र, सेना सैन्यं। प्रवरा चासौ सेना च प्रवरसेना। प्रवरसेनायामक्षौहिण्यो महासङ्ख्यबलरूपाः ता निर्जिता यया सा। एकैव निर्जितप्रवरसेनाऽक्षोभिणी वाणी वादिनो जयति॥

Victorious is the speech of Vādin (i.e. Bappabhatti) (which is in the form of the Gāthās having) *sahi-kajja, khitta-muha, dheṇuyāu* and *diyaro* (as their respective key words), which is unwavering and which alone has conquered Pravarasena (*alternatively*, 'which even-though single has vanquished an Akṣauhiṇī of a strong army). (167)

102*] मा झत्ति तुज्झ दंसण-रहसुम्माएण घिप्पउ वराई।
ता सहसु जा कहेमि त्ति जंपिरी कुणइ सहि-कज्जं ॥१६८

'तुज्झ' तव। 'झत्ति' झटिति। दर्शनात् हर्षस्तस्मादुन्मादस्तेन तव झटितिदर्शनहर्षोन्मादेन। 'मा घिप्पउ' मा गृह्यतां वराकीयमितिकृत्वा। 'ता सहसु' तावत् सहस्व प्रतीक्षस्व हे सुभग। 'जा कहेमि' यावत्त्वागमनं कथयामीति। 'जंपिरी' जल्पनशीला काचित्। 'कुणइ' करोति सखीकार्यमिति॥

'Let the poor girl be not caught by maddening upsurge of emotion at your unexpected sight. So wait till I break news to her' : (saying these words) some lady renders service to her friend. (168)

[103*] वावय तुह खित्त-मुहागयस्स गोसम्मि दंसण-मणाए।
जग्गंतीए वि रयणीए तीए न थमालिओ कलमो॥१६९

'वावय' हे वापक हलिक। 'गोसे' प्रत्यूषसि। 'छेत्तमुहागयस्स' क्षेत्रमुखागतस्य तस्य सतस्तव यद्दर्शनं तत्र मनो यस्याः सा तथा तया

'दंसणमणाए' दर्शनमनसा 'तीए' तया । 'जग्गंतीए वि' जाग्रत्याऽपि । 'रयणीए' रजन्यां रात्रौ । 'न थमालिओ' न पूत्कारेण दूरीकृतः 'कलमो' शालिविशेषः । थमालमकृत्वा शून्योऽयं कलमो मृगादिभिरभिभविष्यत इति मत्वा वापकस्य क्षेत्रमुखागतस्य दर्शनमभिलषन्ती कलमगोपिका जाग्रत्यपि निशि न पूत्करोतीत्यर्थः ॥

Oh tiller, yearning to see you arrive in the front of the field, that girl (guarding the field) did not protect the rice-field (from ravaging animals), eventhough she kept awake the whole night.(169)

[104*] आयामिऊण हरणं पि पंसुली घेणुयाउ नीणेइ ।
बाहिं गेहिय-निग्गमण-कंखिरी अद्ध-रत्तम्मि ॥१७०

हरणमपि 'आयामिऊण' आयाम्य प्रसार्य धेनवश्चोरैरपह्रियन्तामित्यस्य । 'बाहिं' बहिः । गेहिकस्य पत्युः । 'निग्गमण-कंखिरी'[1] निर्गमनमिच्छन्ती । 'पंसुली' पांसुली असती । 'अद्ध-रत्तम्मि' अर्धरात्रे । 'धेणुयाओ' धेनूः । 'णीणेइ' निःसारयति ॥

The unchaste woman takes out (for grazing) the cows at midnight with a view to get them even stolen (by thieves), desiring keenly that her husband go out of the house (on that account). (170)

[105*] छेयाए मुद्ध-दियरस्स लाइया तह विलासिणि-विलासा ।
संढो त्ति परिहरिज्जइ कण्णा-दाणे जह जणेण ॥१७१

छेकया धूर्तया असत्या । 'मुद्ध-दियरस्स' मुग्धदेवरस्य । 'लाइया' लागिता न्यस्तास्तथा विलासिनीविलासाः नयनाञ्जनप्रक्षेपालंकाररचनादयो यथा कन्यादाने । 'संढो त्ति' षण्ढोऽयमिति कृत्वा जनेन परिह्रियते ॥

That roguish, unchaste woman devised for her husband's tender younger brother such lady-like toillete, that people are rejecting

1. किंखिरी.

him in the matter of offering their daughters in marriage, thinking he was a hermaphrodite (171)

( Index Verse 3 * )

'पर-देस-देउलावासियाए' 'जो रक्खइ' [22A] त्ति अणवज्जं ।
आणंदिय-सवणं सेयभिक्खुणो वंदिमो वयणं ॥ १७२

'पर-देस-देउलावासियाए' 'जो रक्खइ'[1] इति गाथाद्वयात्मकं 'अणवज्जं' अनवद्यमत एवानन्दितश्रवणं[2] श्वेतभिक्षोः । 'वंदिमो' वन्दामहे वचनमिति ॥

We bow down to the words of the White-Clad Monk (*seyabhikkhu* i.e. Bappabhatti) (in the form of the two Gāthās having respectively) *paradesa-deulāvāsiyāe* and *jo rakkhai* (as their keywords), which are flawless and which delight the ears. (172)

पर-देस-देउलावासियाए असईए पेल्लिय पइट्ठ*[3] ।
चोरं काऊण पइं कुढियाण[4] समप्पिओ भत्ता ॥१७३

परदेशे देवकुलं देवगृहं तत्र चावासितया असत्या । 'पेल्लिय' प्रेर्य । ततः 'पइट्ठ' प्रविष्टम् । चोरं पतिं । 'काऊण' कृत्वा । 'कुढियाण'[5] पृष्ठतो लग्नानां राजपुरुषाणां । निज-भर्ताऽयं चोर इति समर्पित इति ॥

The unchaste woman, who had taken lodging in a temple in a foreign country, passed off as her husband the thief that had been compelled to enter there, and she handed over to the pursuers her (real) husband as the thief. (173)

जो महइ परस्स धणं कुप्पइ तस्सऽप्पणो ण मग्गंतो ।
जो रक्खइ निययं चिय कुप्पइ तस्सेव[6] विवरीओ[7] ॥१७४

यो 'महति' वाञ्छति परस्य धनं द्रव्यं, तस्य तस्मै परधनं वाञ्छते, आत्मना स्वयं मार्गयन् याचमानो न कुप्यति । द्वयोरपि याचकत्वात् । 'जो रक्खइ' यो रक्षति 'नियय चिय' निजमेव धनं 'तस्सेव' तस्यैव,

1. खखए. 2. श्रमणं. 3. पइयट्ठं. 4. कुठियाण corrected as कुरियाण. 5. कुरियाण. 6. तस्सेय. 7. विवरीयं.

'विवरीओ' विपरीतः यो न रक्षति धनमसावरक्षको विपरीतः तस्मै धनं रक्षते कुप्यति धनमसौ रक्षति अहं तु ददामीति कृत्वा ॥

A begger is not angry with someone who is covetous of another's wealth. But one who does not keep his wealth (i.e. who gives it away), is angry with him only who sticks to his own wealth. (17 )

*

( Conclusion )

गंभीरो अण्णो च्चिय स एस सरसत्तणेण अग्घविओ ।
कइ-कित्तिए समुद्दो अणेय-गाहाउलो कोसो ॥१७५ .

'कइ-कित्तीए समुद्दो' स एषः 'कोसो' कोशः, मुद्दो मुद्दायी । कस्याः ? 'कइकित्ताए' कवेर्बप्पभट्टेः कीर्तिस्तस्याः, मुदं विकाशं ददातीति मुद्दः । अन्यत्र समुद्रः, यस्य कपिभिः सेतुबन्धः कृत इति कपिकीर्त्या उपलक्षितः समुद्रः, ततः 'कइकित्तीए समुद्दो' इति प्राकृतशब्दसाम्यात् । समुद्रश्लेषेति(?) । कोशस्य समुद्रधर्मास्तावत् कथ्यन्ते । कीदृगसावित्याह । 'गंभीरो' गम्भीरार्थत्वात् । अन्यत्र अगाधजलो गम्भीरः । तथा 'अणेय-गाहाउलो' अनेक गाथाभिराकुलः पूर्णः । अन्यत्रानेकग्राहैर्बहुलजलचरैः संकुल इति । श्लेषं दर्शयित्वा व्यतिरेकमाह । भवति कोशोऽयमेतावता धर्मसाम्येन समुद्रः । किन्तु 'सरसत्तणेण' सरसतया विशिष्टरसयोगेन । 'अग्घविओ' पूर्णः । 'अण्णो च्चिय' अन्य एव स समुद्रः । समुद्रो ह्ययं लवणरसोपेतत्वान्न विशिष्टरसयोगी । कोशस्त्वयं गाथानां स्वादुरसत्वात् सरसत्वेन परिपूर्ण इति ॥

Eventhough this treasury (of verses) is like the ocean in that it too is *gaṁbhīra* (1. 'deep', 2. 'profound'), *kai-kittīe mud-da* (1. 'spreading the fame of the monkeys', 2 'spreading the fame of the poet i.e. Bappabhatti'), and *aṇeya gāhāula* (1. 'teaming with a lot of crocodiles,' 2. 'containing numerous Gāthās'), still it is quite a different type of ocean, because it is made precious due to the presence of *rasas* ('poetic sentiments') (as against the ordinary ocean which is salty). (175)

*

महा-वादीन्द्र-श्री-बप्पभट्टि-सूरि-कृतस्य सुभाषित-कोशस्य द्वासप्तत्यधि[22B]क-गाथा-शतस्य समाप्ता टीका तारागणस्येति[1] ॥

1. Thereafter : शुभं भवतु ॥ कल्याणमस्तु ॥ ग्रंथाग्रं श्लोक १००० संख्या ॥

## बप्पभट्टिकृतगाथानां प्रतीक-सूचिः

*

## Glossary of Select Words

अग्घविय १७५ पूर्ण

अणारो १६३ (१) जारः (२) अनःसदृशः(?)शिश्नः (Com )

अल्लियण ८४ आश्लेष, आलीनता

अवरिट्ठिय ५८ (१) उपरिस्थित, (२) अप्रतिष्ठित

इर १२९ किल

इहरा ५४ इतरथा

उत्तुण ८५ गर्वित

उप्पूर २७ निकर, प्राचुर्य

ओड्ढणयं ९० उत्तरीयम्

ओलवण ३० आरोपण(Com.) 'sling','strap'.

कक्कडय ११ अस्थि 'stone of a fruit' [Compare Pk. कंकडुय 'foodgrain that remain unsoftened after boiling']

कलमलय १४७ विरहव्याकुलता

कालिया ३२ कालिमन्

कुडय १६५ घट

कुढिओ १७३ हृतानुगतः राजपुरुषः (=Dn. कुढ)

कुप्पास १४२ कूर्पास, कञ्चुक

कोलव २५ पिठर

खल्ला २७ दृति

गुलिओ १४ काष्ठकन्दुकः

गोस १६९ प्रभात

घराहरिं (v.l. घराघरिं) ३९ गृहाद् गृहम्

चड्डण १५५ विमर्द

चड्डिल ३० नापित

छिछइ १६६ पुंश्चली

छेया १७१ [छेका] धूर्ता, असती

जंपिच्छआ ५८ 'covetous of whatever that is seen'

झिंडुली १६३ पुंश्चली

डिंभ १६७ शिशु

थमालिओ १३९ पूत्कारेण दूरीकृतः (?) 'protected by shouting (to scare away animals)'

दुआलि २७ 'plaster' (?)

नीली ३२ अक्षि-रोग-विशेष

पडल २८ [पटल] cover

पव्वाय १५५ प्रम्लाण, शुष्क, म्लान

पंसुली १७० पुंश्चली

पीलु ४९ गज

पेच्छय ५८ [प्रेक्षक] पर्यालोचक

फडक्कय १४ कन्दुकोल्लालन 'bat'

भंडिया ३० 'barber's razor-bag'

माह्विसक्क २६ महिषयूथ Dn. महिस्सिक्क)

मिह्विया १५२ मिहिका

मुद्द १७५ [मुद्+द] विकासक

मुम्मुर १५० [मुर्मुर] करीषाग्नि

म्ह १३२ अस्मभ्यम्

म्ह ३८ अस्माकम्

रक्खाकंडय १० रक्षाकरण्डक

रूय ३१ तूल

वरॅइ १४५ वराकी

वारिय २७ [वारिक] वारिसेचक

वावय १६९ [वापक] हलिक

विसूर १५६ खिद्-

वेणी १६३ सन्तति

वेलविय १७ प्रतारित

सप्पणामिया १६२ [सर्पनामिका] सर्पाक्षी (औषधि)

संठल ६७ षण्ढत्व

समुल्ल १० (to be emended as समल्ल) आश्री-

सिलट्ठि २२ असियष्टि

सिल्लिय ३० [शिलिका] अल्पा शिला

सिलिंब ८४ शिशु

हड ४४ वृद्ध

हारिवडिय २८ श्रेणिपतित 'fallen in line'

०हुत्त १३ अभिमुख

होरण ४८ प्रावरण

## Corrigenda

| p. | l. | read |
|---|---|---|
| 4 | 2 | गोच्छुप्पणा |
| 5 | 10 | गयवइमाय० |
| 7 | 16 | of the earth |
| 10 | 13 | कोशकार : [3A] |
| 12 | 9 | [3B] विज्जु- |
| 15 | 19 | तत्तथा गगनाक्षि गगनमेवा[4B]क्षि तस्य कालिकानीलीपिहिततारस्य गगनाक्षिणो |
| 17 | 6 | उज्जोइय |
| 17 | 8 | पुनः[5A] |
| 17 | 17 | पायालो० |
| 18 | 11 | ०माऽलङ्कारः ॥ |
| 18 | 25 | प्रतिपाद्न(5B) |
| 3' | 20 | निर्विघ्नद(9A)र्श न |
| 35 | 7 | सभा(10A)या |
| 36 | 11 | because |
| 38 | 20 | 'प(11A)यपण' |
| 39 | 17 | (51)तइयच्छि |
| 40 | 14 | तरुण-ज(11B)ण- |
| 41 | 25 | युगां(12A)हे |
| 43 | 13 | फलम्मि(12B) |
| 44 | 5 | पओहर |
| 45 | 1 | त्ति |
| 45 | 11 | कडय |
| 47 | 22 | कहा (13B)णग्ग |
| 48 | 4 | 'वावडच्छि' त्ति |
| 51 | 7 | कोव |
| 64 | 6 | विसूरसि |
| 64 | 9 | चिन्तितऽये |

# PRAKRIT TEXT SOCIETY

**(C/o L.D. Institute of Indology, Navrangpura, Ahmedabad-380009)**

**Latest Price-List of the Prakrit Text Series**

(January 1987)

| Serial No. | Name of the Publication | Price Rs. |
|---|---|---|
| 2. | Prākṛta-Paiṅgalaṁ, Part I : Ed. by Dr. Bhola Shankar Vyas. pp. 6+10+6+700 (1959) | 16/- |
| 3. | Cauppannamahāpurisacariyaṁ : Ācārya Śrī Śilāṅka Ed. by Pt. A. M. Bhojak. pp. 3+66+384 (1961) | 21/- |
| 4. | Prārta-Paiṁgalaṁ, Part II : Ed. by Bhola Shankar Vyas. pp. 15+14+593 (1962) | 15/- |
| 5. | Ākhyānakamaṇikośa-vṛtti : Ed. by Muni Shri PunyaAijayji. pp. 8+25+3+422 (1962) | 21/- |
| 6. | Paumacariyaṁ, Part I Ed. by Dr. H. Jacobi, Second edition, revised by Muni Shri Punyavijayaji. 8+40+376 (1962) | 28/- |
| 8. | Pāsaṇāhacariu : Ed. and translated into Hindi by Prof. Prafulla Kumar Modi. pp. 7+124+170+232 (1965) | 25/- |
| 9. | Nandisūtram with Cūrṇi : Ed. by Muni Shri Punyavijayaji. pp. 18 + 103 (1966) | 10/- |
| 10. | Nanditūtram with Vṛtti Ed. by Muni Shri Punyavijayaji. pp. 16 + 216 (1966) | 15/- |
| 11. | Prākṛta Sarvasva : Ed. by Dr. Krishna Chandra Acharya. pp. 17 + 1 + 247 (1968) | 20/- |
| 12. | Paumacariyaṃ, Part II : Ed. by Dr. H. Jacobi, Revised by Muni Shri Punyavijayaji. pp. 16 + 220 + 158 (1968) | 32/- |
| 13. | Kathākośa of Muni Śrīcandra (Apabhraṁśa) : Ed. by Dr. H. L. Jain. pp. 12 + 114 + 438 (1969) | 30/- |

14. **Vajjālaggaṁ** : Ed. by Prof. M. V. Patwardhan. pp. 60 + 638 (1969) 21/–
15. **Mūlaśuddhi Prakaraṇa** : Ed. by Pt. A.M. Bhojak. pp. 10 + 9 + 224 20/–
16. **Puhaicandacariya** : Ed. by Muni Shri Ramnikvijayaji and Pt. A.M. Bhojak. pp. 8 + 45 + 222 (1972) 30/–
17. (a) Dasakāliya Cūrṇi (Pothi) Ed. by Muni Shri Punyavijayji. pp. 17 + 296 (1973) 30/–
    (b) Dasakāliya Cūrṇi (Boo) Ed. by Muni Shri Punyavijayaji. pp. 294 (1973) 45/–
18. Gauḍavaho of Vakpatirāja : Ed. by Prof. N.G. Suru. pp. 8 + 101 + 339 (1975) 25/–
19. (a) Sūtrakṛitāṅga Cūrṇi (Pothi), Part I : Ed. by Muni Shri Punyavijayaji. pp. 402 (1975) 25/–
    (b) Sūtrakṛitāṅga Cūrṇi (Book), Part I : Ed. by Muni Shri Punyavijayaji. pp. 8 + 248 (1975) 30/–
20. Setubandha : translated by Dr. Krishna Kanta Handiqui. pp. 10 + 147 + 331 + 318 (1976) 40/–
21. Gāhākosa of Hāla : Ed. by Dr. M.V. Patwardhan. pp. 8+295 (1980) 35/–
22. Prākṛtādhyāya of Kramadīśvara : Ed. by Dr. Satya Ranjan Banerjee. pp. 8 + 49 + 80 (1980) 5/–
23. Apabhraṁsa Section of Hemacandra's Siddhahema Ed. and Translated by Dr. K.B. Vyas. pp. 20+197 (1982) 8/–
24. Tarāyaṇa (Tārāgaṇa) of Śaṅkuka : An Anthology of Bappabhaṭṭi-sūri's Prakrit Muktakas : Ed. and translated by Dr. H.C. Bhayani. pp. 8+17+74+4 (1987) 20/–

---

Nos. *1* and 7 are out of print.